5

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 615

Title A work on Grammar.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 615 Subject : Grammar

Title : A work on Grammar.

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 10.5" by 4.8" Extent : 35 folls.

Language : Sanskrit. Script : Devanagari

Remarks : Ends abruptly.

श्रीलक्ष्मणायनमः॥ ॥समर्थःपदविधिरितिकोयंशब्दः विपूर्वाद्धानः कर्मसाधनइकारो विधी
यतेविधिरिति।किंपुनरविधीयतेसमासोविभक्तिविधानंपरांगवद्भावश्च।किंपुनरयमधिका
रःआहोखित्परिभाषा।कःपुनरधिकारपरिभाषयोर्विशेषः।अधिकारःप्रतियोगंतस्यानिर्देशा
र्थइतियोगेयोगउपतिष्ठते।परिभाषापुनरेकदेशस्थासती कृत्स्नंशास्त्रंअभिज्वलयतिप्रदी
पवत्।तद्यथाप्रदीपःसुप्रज्वालितःएकदेशस्थःसर्ववेश्माभिज्वलयति।कःपुनरत्रप्रयत्नविशे
षः।अधिकारेसतिस्वरयितव्यं।परिभाषायांतुसर्वमपेक्ष्यं।तथेदमपरंद्वैतंभवति।एकार्थीभा
वोवासामर्थ्यं।व्यपेक्षावेति।तत्रैकार्थीभावेसामर्थ्येधिकारेचसतिसमासएकःसंगृहीतोभ
वति।विभक्तिविधानंपरांगवद्भावश्चासंगृहीतः।व्यपेक्षायांपुनःसामर्थ्येधिकारेचसति
विभक्तिविधानंपरांगवद्भावश्चसंगृहीतोभवति।समासस्त्वेकोसंगृहीतः।अन्यत्रचेदानीं
समर्थग्रहणानिवयुक्तग्रहणानिचकर्त्तव्यानिभवन्ति।क्वान्यत्र।इदसुसोःसामर्थ्येनचवाहादेवे १

युक्तइति।व्यपेक्षायांपुनःसामर्थ्येपरिभाषायांचसत्यांयावांव्याकरणेपदगंधोनामससर्वःसंगृ
हीतोभवति।समासस्त्वेकोसंगृहीतः।तत्रैकार्थीभावःसामर्थ्यंपरिभाषाचेत्येवंसूत्रमभिन्नरकं न२
भवति।एवमपिक्वचिदकर्त्तव्यंसमर्थग्रहणंक्रियते।क्वचिच्चकर्त्तव्यंनक्रियते।अकर्त्तव्यंतावत्क्रि
यते।समर्थानांप्रथमाद्वेति।कर्त्तव्यंनक्रियतेकर्म्मण्यण।समर्थादिति।ननुचगम्यतेतत्रसामर्थ्यंकुं
म्भकारोनगरकारइतिसत्यंगम्यतेउत्पद्यतेतुप्रत्ययः।सएवतावत्समर्थादित्याद्यः।अथसमर्थग्रहणंकि
मर्थंवक्ष्यतिद्वितीयाश्रितादिभिःसमस्यते।कष्टश्रितोनरकश्रितः।समर्थग्रहणं।किमर्थं।पश्यदेवदत्तक
ष्टंश्रितोविष्णुमित्रोगुरुकुलं।तृतीयातत्कृतार्थेनगुणवचनेन।शंकुलाखंडः।किरिकाणः।समर्थग्र
हणंकिमर्थं।किंकरिष्यसिशंकुलया।खंडोसौधावतिउपलेन।चतुर्थीतदर्थार्थबलिहितसुखरक्षि
तैः।गोहितं।वृषभहितं।समर्थग्रहणंकिमर्थं।धर्म्मःसुखंगोभ्यो।हितंदेवदत्ताय।पंचमीभयेन।वृकभयं।
चोरभयंसमर्थग्रहणंकिमर्थं।गच्छत्वंमावृकेभ्योभयंदेवदत्ताद्यज्ञदत्तस्य।षष्ठीसुबंतेनसमस्यते।राज

भा॰ द्वि॰ २ पुरुषः। ब्राह्मणकंबलः। समर्थग्रहणं किमर्थं। भार्या राज्ञः पुरुषो देवदत्तस्य। सप्तमीशौंडैः। अक्षशौंडः।
स्त्रीशौंडः। समर्थग्रहणं किमर्थं। कुशलो देवदत्तोऽक्षेषु शौंडः पिबति पानागारे। अथ क्रियमाणेपि समर्थ
ग्रहणे इह कस्मान्न भवति। महत्कष्टंश्रित इति। न वा भवति महाकष्टंश्रित इति। भवति यदैतद्वाक्यं। म
हत्कष्टं महाकष्टं महाकष्टंश्रितो महाकष्टश्रित इति। यदा त्वेतद्वाक्यं भवति। महत्कष्टंश्रित इति तदा
न भवितव्यं। तदा च प्राप्नोति तदा कस्मान्न भवति। कस्य कस्मान्न भवति। किं द्वयोरेहोस्विद्बहूनां
कस्मान्न भवति। सुप्सुपेति वर्तते। ननु चोक्तमाकृतौ शास्त्राणि प्रवर्त्तंते। न द्व्यर्था। प्रातिपदिको। दि
ति वर्त्तमाने अन्यस्माच्चान्यस्माच्च प्रातिपदिकादुत्पत्तिर्भवति। सत्यमेवमेतत्। आकृतिस्तु प्रत्येकं परि
समाप्यते। ननु समुदाये। यावति परिसमाप्यते प्रातिपदिकादिति तावति उत्पत्त्या भवितव्यं।
प्रत्येकं चैतत्परिसमाप्यते न समुदाये। एवमिहापि यावत्येतत्परिसमाप्यते सुप्सुपेति तावतः स
मासेन भवितव्यं। द्वयोश्चैतत्समाप्यते। न बहुषु द्वयोस्तर्हि कस्मान्न भवति। असामर्थ्यात्। कथमस २

रा।

मर्थ्यं। सापेक्षमसमर्थं भवतीति। यदि सापेक्षमसमर्थं भवतीत्युच्यते राजपुरुषोभिरूपः रा
जपुरुषो दर्शनीयः। अत्र वृत्तिर्न प्राप्नोति। नैष दोषः। प्रधानमत्र सापेक्षं भवति प्रधानस्य सा
पेक्षस्यापि समासः। यत्र तर्ह्यप्रधानं सापेक्षं भवति तत्र वृत्तिर्न प्राप्नोति देवदत्तस्य गुरुकुलं।
देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति अत्र वृत्तिर्न प्राप्नोति। नैष दोषः। समुदायापेक्षात्र ष
ष्ठी। सर्वं गुरुकुलमपेक्षते। यत्र तर्हि न समुदायापेक्षा षष्ठी तत्र वृत्तिर्न प्राप्नोति।। किमोदनः शालीनांसक्तुरा
ढकमापणीयानां। कुतो भवान्पाटलिपुत्रक इति। इहचापि देवदत्तस्य गुरुकुलं देवदत्तस्य गुरुपुत्रो देवद गु
त्तस्य दासभार्येति यद्येषा समुदायापेक्षा षष्ठी स्यान्नैतन्नियोगतो गम्येत देवदत्तस्य यो गुरुस्तस्य यः
पुत्र इति। किं तर्हि। अन्यस्यापि गुरुपुत्रो देवदत्तस्य किंचिदित्येषोर्थो गम्येत। गम्यते तु नियोगतो देवदत्त
स्य यो गुरुस्तस्य यः पुत्र इत्येषोर्थो गम्यते अतो मन्यामहे न एषा समुदायापेक्षा षष्ठीति। अन्यत्र खल्व
पि समर्थग्रहणे सापेक्षस्यापि कार्यं न भवति। क्वान्यत्र। इसुसोः सामर्थ्ये ब्राह्मणस्य सर्पिष्करोतीति न

स्मान्नतत्रकष्टंवक्तुंसापेक्षमसमर्थंभवतीति।वृत्तिस्तर्हिकस्मान्नभवति।महत्कष्टंश्रितइतिसवि
शेषणानांवृत्तिर्न।वृत्तस्यवाविशेषणंनप्रयुज्यतइतिवक्तव्यं।यदिसविशेषणानांवृत्तिर्नवृ
त्तस्यवाविशेषणंनप्रयुज्यतइत्युच्यतेदेवदत्तस्यगुरुकुलंदेवदत्तस्यगुरुपुत्रोदेवदत्तस्यदास
भार्येत्यत्रवृत्तिर्नप्राप्नोति।अगुरुपुत्रादीनामितिवक्तव्यं।तत्तर्हिवक्तव्यंसविशेषणानांवृत्ति
र्नवृत्तस्यवाविशेषणंनप्रयुज्यतेअगुरुपुत्रादीनामिति।नवक्तव्यं।वृत्तिस्तर्हिकस्मान्नभवति।अ
गमकत्वात्।इहसमानार्थेनवाक्येनभवितव्यंसमासेनच।यश्चेहार्थोवाक्येनगम्यतेमहत्क
ष्टंश्रितइति।नासौजातुचित्समासेनगम्यतेमहत्कष्टश्रितइति।एतस्माद्धेतोर्ब्रूमोऽगमकत्वा
दितिनब्रूमोऽप्यशब्दःस्यादिति।यत्रचगमकोभवतितत्रवृत्तिः।तद्यथादेवदत्तस्यगुरुकुलंदेव
दत्तस्यगुरुपुत्रोदेवदत्तस्यदासभार्येति।तत्रयद्यगमकत्वंहेतुर्नार्थःसमर्थग्रहणेन।इहापि
नार्थोराज्ञःपुरुषोदेवदत्तस्येतियोऽर्थोवाक्येनगम्यतेनासौजातुचित्समासेनगम्यतेनार्थो ३

राजपुरुषोदेवदत्तस्येतितस्मान्नार्थःसमर्थग्रहणेन।इदंतर्हिप्रयोजनं।असमर्थसमासोन
समासोगमकः।तस्यसाधुत्वंमाभूत्।अकिंचित्कुर्वाणाअमाषंहरमाणंअगाधादुत्सृष्टमिति।ए
तदपिनास्तिप्रयोजनं।अवश्यंकस्यचिन्नञ्समासस्यासमर्थस्यगमकस्यसाधुत्वंवक्तव्यं।असूर्यं
पश्यानिमुखानि।अपुनर्गेयाःश्लोकाः।अश्राद्धभोजीब्राह्मणः।सुडनपुंसकस्येत्येननियमार्थंभ
विष्यति।एतस्यैवासमर्थसमासस्यनञ्समासस्यगमकस्यसाधुत्वंभवतिनान्यस्येति।तस्मा
न्नार्थःसमर्थग्रहणेन।अथक्रियमाणेपिसमर्थग्रहणेस~~मर्थग्रह~~णेसमर्थमित्युच्यते।किंस
मर्थंनाम।पृथगर्थानामेकार्थीभावःसमर्थवचनं।पृथगर्थानांपदानामेकार्थीभावःसमर्थ
मित्युच्यते।क्वपुनःपृथगर्थानिक्वैकार्थानि।वाक्येपृथगर्थानि।राज्ञःपुरुषइति।समासेपुनरेका
र्थानि।राजपुरुषइति।किमुच्यतेपृथगर्थानीति।यावताराज्ञःपुरुषआनीयतामित्युक्तेराज
पुरुषआनीयते।राजपुरुषइतिचसएव।नापिब्रूमोऽन्यस्यानयनंभवतीति।कस्तर्ह्येकार्थीभा

वद्भतो विशेषः सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसंबंधः स्वर इति। सुबलोपो भवति वाक्ये रा
ज्ञः पुरुष इति। समासे तु न भवति राजपुरुष इति। व्यवधानं भवति वाक्ये राज्ञः ऋद्धस्य पुरुष इति। समा
से तु न भवति राजपुरुष इति। यथेष्टमन्यतरेणाभिसंबंधो भवति वाक्ये राज्ञः पुरुषः पुरुषो राज्ञ इति। समा
से मा भवति राजपुरुष इति। द्वौ स्वरौ भवतो वाक्ये राज्ञः पुरुष इति। समासे पुनरेक एव राजपुरुष इति
नैक एकार्थीभाववकृता विशेषः। किं तर्हि वाचनिकान्येतानि। अह हि भगवान् सुपो धातुप्रातिपदिक
योः। उपसर्जनं पूर्वं समासस्यान्तोदात्तो भवतीति। इमे तर्हि एकार्थीभावकृता विशेषाः संख्या वि
शेषो। व्यक्ताभिधानं उपसर्जनविशेषणं चयोग इति। संख्याविशेषो भवति वाक्ये राज्ञः पुरुषः
राज्ञोः पुरुषः राज्ञां पुरुष इति। समासे न भवति राजपुरुष इति। अस्ति कारणं येनैतदेवं भवति। किं का
रणं। यो सौ विशेषवाची शब्दस्तदसान्निध्यात्। अंग हि भवानसमुच्चारयतु गंस्यते स विशेषः ननु चैत
तेनैवं भवितव्यं न हि शब्दकृतेन नामार्थेन भवितव्यं। अर्थकृतेन नाम शब्देन भवितव्यं। तदेतदेवं ४

दृश्यतां। अर्थरूपमेवं जातीयकं येनात्र विशेषो न गम्यत इति। अवश्यं चैतदेवं विज्ञेयं। यो हि मन्यते यो
सौ विशेषवाची शब्दस्तदसान्निध्यादत्र विशेषो न गम्यत इति इह तस्य विशेषो गम्येत अप्सुवरो गोष्ठ
वरो वर्षासुज इति। व्यक्ताभिधानं भवति वाक्ये ब्राह्मणस्य कंबलस्तिष्ठतीति। समासे पुनरव्यक्ताभि
धानं ब्राह्मणकंबलस्तिष्ठतीति संदेहो भवति संबुद्धिर्ब्राह्मणी समासो वेति। एषोप्य विशेषः। भवति हि
किं चिद्वाक्ये अव्यक्तं तद्यथा समासे व्यक्तं। वाक्येनावद्यकं अर्द्धं च शो देवदत्तस्येति संदेहो भवति पलुगु
णस्य वा देवदत्तस्य यदर्धं अथवा यो सतीर्थ्यः पणानामतस्य यदर्धमिति। तत्र समासे व्यक्तं भवति अ
र्धपशुर्देवदत्तस्येति। उपसर्जनविशेषणं भवति वाक्ये ऋद्धस्य राज्ञः पुरुष इति। समासे न भवति राज
पुरुष इति। एषोप्य विशेषः समासेप्युपसर्जनविशेषणं भवति। तद्यथा देवदत्तस्य गुरुकुलं देवदत्तस्य
गुरुपुत्रो देवदत्तस्य दासभार्येति। चयोगो भवति वाक्ये स्वयोगः स्वामिचयोगश्चेति स्वस्वयो
गः राज्ञो गोश्चाश्वश्च पुरुषश्चेति। समासे न भवति राजगवाश्वपुरुषा इति। स्वामिचयोगः देवदत्त

भा·द्वि· ५

स्ययज्ञदत्तस्यविष्णुमित्रस्यचगौरिति।समासेनभवतिदेवदत्तयज्ञदत्तविष्णुमित्राणांगौरिति।अथै
नस्मिन्नेकार्थीभावकृतेविशेषेकिंस्वाभाविकंशब्दैरर्थानामभिधानमाहोस्विद्वाचनिकंस्वाभाविक
मित्याहाकुतएतत्।अर्थानादेशनात्।नह्यर्थाआदिश्यंते।कथंपुनरर्थानादेशनेवंब्रूयात्।अर्थाआ
दिश्यंतइति।यदाहभगवान्।अनेकमन्यपदार्थेचार्थेद्वंद्वश्चप्रत्येकंनिवर्त्ततइति।नैतान्यर्थादेशना
निस्वभावतएतेषांशब्दानांएतेष्वर्थेष्वभिनिविष्टानांनिमित्तत्वेनान्वाख्यानंक्रियते।तद्यथाकूपेहस्त
दक्षिणःपन्थाः।अत्रैवेदमसंपश्येति।स्वभावतस्तत्रस्थस्यपथश्चेदमसश्चनिमित्तत्वेनान्वाख्यानंक्रि
यते।एवमिहापिचार्थेयःसद्वंद्वः।अन्यपदार्थेयःसबहुव्रीहिरिति।किंपुनःकारणमर्थानादि
श्यंते।नवलाघवार्थंलघ्वर्थंह्यर्थानादिश्यंते।अवश्यंखल्वनेनार्थानादिशताकेनचिच्छब्देनअर्थनिर्दे
शःकर्त्तव्यःस्यात्।तस्यचतावत्केनकृतःयेनासौक्रियते।अथतस्यकेनचित्कृतस्तस्यकेनकृतइ
त्यनवस्था।असंभवःखल्वप्यर्थादेशनस्य।कोहिनामसमर्थोधातुप्रातिपदिकप्रत्ययनिपा ५

तानामर्थानादेष्टुं।नचैतन्मंतव्यंप्रत्ययार्थोनिर्दिष्टप्रकृत्यर्थोनिर्दिष्टइतिभवतिहिगुणाभिधा
नेगुणिनःसंप्रत्ययःतद्यथाशुक्लःकृष्णइति।विषमउपन्यासः।सामान्यशब्दाएतेएवंस्युःसामान्य
शब्दाश्चनांतरेणविशेषंप्रकरणंवाविशेषेष्ववतिष्ठंते।यतस्तुखलुनियोगतोवृत्तिरित्युक्तेस्वभाव
तःकस्मिंश्चिदेवविशेषेवृत्तिःशब्दोवर्त्तते।अतोमन्यामहेनेमेसामान्यशब्दाइति।नचेत्सामान्यशब्दाः
५ प्रकृतिः प्रकृत्यर्थेवर्त्ततेप्रत्ययःप्रत्ययार्थेवर्त्तते।अप्रवृत्तिःखल्वप्यर्थादेशनस्यबहवोहिशब्दायेषामर्था
नविज्ञायंते।जर्भरीतुर्फरीतू।अंतरेणखल्वपिशब्दप्रयोगंबहवोर्थागम्यंते।अक्षिनिकोचैःपाणिवि
हारैश्चनखल्वपिनिर्ज्ञातस्यार्थस्यान्वाख्यानेकिंचिदपिप्रयोजनमस्ति।योहिब्रूयात्पुरस्तादादि
त्यउदेतिपश्चादस्तंगच्छतिमधुरोगुडःकटुकंआर्द्रकंचरमितिकिंतेनकृतंस्यात्।चावचनानर्थ
क्यंचस्वभावसिद्धत्वात्।चावचनमनर्थकं।किंकारणं।स्वभावसिद्धत्वात्।इहद्वौपक्षौवृत्तिपक्ष
श्चावृत्तिपक्षश्चेति।स्वभावतश्चैतद्भवतिवाक्यंचसमासश्चातत्रस्वाभाविकेवृत्तिविषयेनित्ये

मा·द्वि·
६

समासे प्राप्ते वावचनेन किमन्यच्छक्यमभिसंबंधुमन्यदतः संज्ञायाभावाभावा। विधेनो। न स्याद्वा
र्थो वा वचनेन। अथ ये वृत्तिं वर्त्तयंति किं त आहुः परार्थाभिधानं वृत्तिरित्याहुः। अथ तेषामेवं ब्रु
वतां किं जहत्स्वार्था वृत्तिर्भवति आहोस्विदजहत्स्वार्था। किं चातः। यदि जहत्स्वार्था वृत्तिः स्याद्रा
जपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति औपगवमानयेत्यपत्यमात्रस्य। अथ अजहत्स्वा
र्था वृत्तिरुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। का पुनर्वृत्तिर्न्याय्या।
जहत्स्वार्था। युक्तं पुनर्जहत्स्वार्था नाम वृत्तिः स्यात्। बाढं युक्तं। एवं हि दृश्यते लोके पुरुषोयं पर
कर्मणि प्रवर्त्तमानः स्वकर्म जहाति। तद्यथा। तक्षा राजकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति
। एवं युक्तं यद्राजा पुरुषार्थे प्रवर्त्तमानः स्वार्थं जह्यात्। उपगुश्चापत्यार्थे वर्त्तमानः स्वमर्थं ज
ह्यात्। ननु चोक्तं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। औपगवमानये
त्युक्तेऽपत्यमात्रस्येति। नैष दोषः। जहदप्यसौ स्वार्थं नात्यन्ताय जहाति। यः परार्थविरोधी स्वा ६

र्थस्तं जहाति। तद्यथा। तक्षा राजकर्मणि प्रवर्त्तमानः स्वं तक्षकर्म जहाति न तु हिक्कितहसितकं
डूयितानि। न चायमर्थः परार्थविरोधी विशेषणं नाम। तस्मान्न हास्यति। अथवान्वयाद्विशेष
णं भविष्यति। तद्यथा। घृतघटस्तैलघट इति। निषिक्तेपि घृते तैले वान्वयाद्विशेषणं भवति। अ
यं घृतघट इति। विषम उपन्यासः। संभवति हि तत्र या च यावती चार्थमात्रा। अंग हि भवानग्रे। नि
ष्पन्ने घृतघटे तृणकूर्चेन क्षालयतु न गंस्यते स विशेषः। यथा तर्हि मल्लिकापुटश्चंपकपुट इति। नि
कीर्णास्वपि सुमनःस्ववायाद्विशेषणं भवति। अयं मल्लिकापुटः अयं चंपकपुट इति। अथ
वा समर्थाधिकारो वृत्तौ क्रियते। सामर्थ्यं नाम भेदः संसर्गो वा। अपर आह भेदसंसर्गौ वा सा
मर्थ्यमिति। कः पुनर्भेदः संसर्गो वा। इह राज्ञ इत्युक्ते सर्वस्वं प्रसक्तं पुरुष इत्युक्ते सर्वः स्वामी प्र
सक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजा पुरुषं निवर्त्तयत्यन्येभ्यः स्वामिभ्यः पुरुषोपि
राजानमन्येभ्यः स्वेभ्यः। एवमेतस्मिन्नुभयतो व्यवच्छिन्ने यदि स्वार्थं जहाति कामं जहातु न जातु वि

भा॰द्वि॰ न्तुरुषमात्रस्यानयनं न विष्यति। अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः। युक्तं पुनर्यदजहत्स्वार्था नाम वृत्तिः
७ स्यात्। न वा तद्युक्तम्। एवं हि दृश्यते लोके भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति संचयायैव प्रवर्त्त
ते। ननु चोक्तमुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। कस्याः पुनर्द्विवचनं प्राप्नो
ति प्रथमायाः। न प्रथमासमर्थो राजा। षष्ठ्यास्तर्हि प्राप्नोति। न षष्ठीसमर्थः पुरुषः प्रथमायाः। एवं तर्हि प्रा
प्नोति। ननु चोक्तं न प्रथमासमर्थो राजेति। अनभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्नः। तत्र प्राति
पदिकार्थे प्रथमेति प्रथमाया एव द्विवचनं प्राप्नोति। संघातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिः
संघातस्यैकत्वमर्थस्तेनावयवसंख्यातः सुबुत्पत्तिर्न। न विषमः परस्परव्यपेक्षां सामर्थ्यमेके। परस्पर
व्यपेक्षां सामर्थ्यमेक इच्छन्ति। का पुनः शब्दयोर्व्यपेक्षा। न ब्रूमः शब्दयोरिति। किं तर्ह्यर्थयोः। इह राज्ञः
पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति पुरुषोऽपि राजानमपेक्षतेऽहमस्येति तयोरभिसं
बंधस्य षष्ठी वाचिका भवति। तथा कष्टं श्रित इति क्रियाकारकयोरभिसंबंधस्य द्वितीया वाचिका ७

भवति। अथ य एकार्थीभावः सामर्थ्यं अथापि व्यपेक्षा सामर्थ्यं किं गतमेतदियता सूत्रेण आहोस्विद
न्यतरस्मिन्पक्षे भूयः सूत्रं कर्त्तव्यं। गतमित्याह। कथं। समर्थमर्थशब्देन समासः। संवोपसर्गः उपसर्गा
श्च पुनरेवमात्मकाः। यत्र कश्चित्क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः। न चेह कश्चित्क्रिया
वाची शब्दः प्रयुज्यते येन समः सामर्थ्यं स्यात्। तत्र प्रयोगादेतद्गंतव्यं नूनमत्र कश्चित्प्रयोगार्हः शब्दो न
प्रयुज्यते येन समः सामर्थ्यमिति। तद्यथा धूमं दृष्ट्वाऽग्निरत्रेति गम्यते। त्रिविष्टब्धकं दृष्ट्वा परिव्राजक
इति। कः पुनरसौ प्रयोगार्हः शब्दः उच्यते। संगतार्थं समर्थं संसृष्टार्थं समर्थं संप्रेक्षितार्थं समर्थं संबद्धा
र्थं समर्थमिति। तद्यदा तावदेकार्थीभावः सामर्थ्यं तदैवं विग्रहः करिष्यते संगतार्थः समर्थः संसृष्टा
र्थः समर्थ इति। तद्यथा संगतं घृतं संगतं तैलमित्युच्यते एकीभूतमिति गम्यते। संसृष्टार्थः समर्थ इ
ति। संसृष्टोऽग्निरित्युच्यते एकीभूत इति गम्यते। यदा व्यपेक्षा सामर्थ्यं तदैवं विग्रहः करिष्यते। संप्रेक्षि
तार्थः समर्थः संबद्धार्थः समर्थ इति। कः पुनरत्र बधात्वर्थः। व्यतिषंगः संबद्ध इत्युच्यते सयोरज्वाय

मा·द्वि·
१

सावाकीलंवाव्यतिषक्तोभवति।नावश्यंबध्नातिःसंगएवार्थेवर्त्तते।किंतर्ह्यहानावपिवर्त्तते।संबद्धा
विमौदम्पतीइत्युच्यतेयावन्योन्यंनजहीतः।अथवाभवतिवैसजातीयकेष्वपिबध्नातिर्वर्त्तते।तद्यथ
अस्तिनोगर्गैःसंबंधोस्तिनोवत्सैःसंबंधइति।अथैतस्मिन्व्यपेक्षायांसामर्थ्येयोसावेकार्थीभावकृ
तोविशेषःसवक्तव्यः।तत्रनानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः।एतस्मिन्व्यपेक्षायांसा
मर्थ्येनानाकारकान्निघातयुष्मदस्मदादेशाःप्रवर्त्तंतितेषांप्रतिषेधोवक्तव्यः।निघात।अयंदंडोह
रानेन।।अस्तिदंडस्यहरतेनेतिकृत्वानिघातःप्राप्नोतियुष्मदस्मदादेशपक्षओदनंतवभविष्यति।ओ
दनंपचममभविष्यति।अस्त्योदनस्ययुष्मदस्मदोश्चव्यपेक्षेतिवांनावादयःप्राप्नुवंतितेषांप्रति
षेधोवक्तव्यः।किमुच्यतेनानाकारकादितियदानेनैवासत्यपक्रियते।मापिब्रूमोन्येनासत्यक्रि
यतेइतिकिंतर्हि।शब्दप्रमाणकावयंयच्छब्दआहतदस्माकंप्रमाणं।शब्दश्चेहसत्त्वमाह।अयंदं
डःअस्तीतिगम्यते।अयंदंडःकर्त्ताभूत्वानेनशब्देनाभिसंबध्यमानःकरणंसंपद्यते।तद्यथाकश्चि १

त्कंचित्पृच्छतिक्वदेवदत्तइतिसआहअमुष्मिन्यावएषअसौवृक्षइति।कतरस्मिन्यस्तिष्ठतीति।सवृक्षोधिकार
णंभूत्वान्येनशब्देनाभिसंबध्यमानःकर्त्तासंपद्यते।अव्ययेसमासप्रतिषेधः।अव्ययेसमासस्यप्रति
षेधोवक्तव्यः।राज्ञोगौश्चाश्वश्चपुरुषश्चेतिराजगवाश्वपुरुषाइति।समर्थतराणांवा।समर्थतराणां
वापदानांसमासोभविष्यति।कानिपुनःसमर्थतराणियानिद्वंद्वभावीनि।कुतएतदेषांह्याश्रुततरा
वृत्तिःप्राप्नोति।।तद्यथासमर्थतरोयंमाणवकोध्ययनायेत्युच्यते।आश्रुततरोयंथइतिगम्यते।अ
परआह।समर्थतराणांवा।समर्थतराणांवापदानांसमासोभविष्यति।कोनिपुनःसमर्थतराणि
यानिद्वंद्वभावीनि।कुतएतदेतानिसमानविभक्तीनि।अन्यविभक्तीराज्ञाभवतिहि।विशेषःस्वश्रि
तश्चान्तरिपितृव्यपुत्त्रेव।समुदायसामर्थ्याद्वा।सिद्धं।।समुदायसामर्थ्याद्वापुनःसिद्धमेतत्समुदा
येनराज्ञःसामर्थ्यंभवतिनावयवेन।अपरआह।समर्थतराणांवा।समुदायसामर्थ्यान्न।समर्थत
राणांवापदानांसमासोभविष्यति।कुतएतत्समुदायसामर्थ्यादेवाअस्मिन्पक्षेवेसेनदसमर्थि

भा॰ द्वि॰ ७ तं भवति। एतदसमर्थितं कथं नैव वा पुनरत्र राज्ञोऽश्वपुरुषावपेक्षमाणस्य गवा सह समासो भव-
ति। कथं तर्हि। गोः राजानमपेक्षमाणस्याश्वपुरुषाभ्यां सह समासो भवति। प्रधानमत्र तदा गौर्भ-
वति। भवति च प्रधानस्य सापेक्षस्यापि समासः। आख्यातं साव्ययकारकविशेषणं वाक्यं। आख्या-
तं साव्ययं सकारकं साकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यं। साव्ययं उच्चैः पठति। नीचैः पठति।
सकारकं ओदनं पचति। सकारकविशेषणं ओदनं मृदु विशदं पचति। सक्रियाविशेषणं च। सक्रि-
याविशेषणं चेति वक्तव्यं। सुष्ठु पचति। दुष्ठु पचति। अपर आह। आख्यातं सविशेषणमित्येव। सर्वा-
णि ह्येतानि क्रियाविशेषणानि। एकतिङ्। एकतिङ्वाक्यसंज्ञं भवतीति वक्तव्यं। ब्रूहि। समानवा-
क्ये निघातयुष्मदस्मदादेशाः। समानवाक्य इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः। किं प्रयो-
जनं। नानावाक्ये मा भूवन्निति निघातः। अयं दण्डो हरानेन। ओदनं पच तव भविष्यति। ओदनं पच मम भ-
विष्यति। योगे प्रतिषेधश्चादिभिः। योगे प्रतिषेधो वक्तव्यः। ग्रामस्तव च स्वं ग्रामो मम च स्वं। किमर्थमि- ५

दमुच्यते। यथान्यासमेव चादिभिर्योगे प्रतिषेधश्चोद्यते। इदमद्यापूर्वं क्रियते। वाक्यसंज्ञा समान- ८
वाक्याधिकारश्च। न ह्येष विजानीयात्सर्वमेतद्द्विकल्प्यत इति। तदाचार्यः सुहृद्भूत्वा चावष्टे चा-
दिभिर्योगे यथान्यासमेव भवतीति। सा चावश्यं वाक्यसंज्ञा कर्त्तव्या भवति। समानवाक्याधिकार-
श्च वक्तव्यः। समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानं। असमर्थत्वात्। समर्थनि-
घाते हि सति समानाधिकरणयुक्तयुक्तेषूपसंख्यानं कर्त्तव्यं स्यात्। समानाधिकरणे पटवे
ते दास्यामि। मृदवे ते दास्यामि। समानाधिकरणयुक्तयुक्ते न घास्तिष्टति कूले वृक्षस्य वा वने शा-
खायां। शालीनां ते ओदनं ददामि। शालीनां मे ओदनं ददाति। किं पुनः कारणं न सिध्यति। असम-
र्थत्वात्। राजगवीक्षीरे द्विसमासप्रसंगो द्विषष्ठीभावात्। राजगवीक्षीरे द्विसमासप्रसंगः। राज-
गवीक्षीरं किं कारणं। द्विषष्ठीभावात्। द्वे ह्यत्र षष्ठ्यौ राज्ञः गोः क्षीरमिति। किमुच्यते। द्विसमा-
सप्रसंग इति। यावता सुप्सुपेति वर्त्तते न तावद्द्विसमासप्रसंग इति। नैवं विज्ञायते द्वायाः सुब-

तयोः समासप्रसंगो द्विसमासप्रसंग इति। कथं तर्हि द्विप्रकारकस्य समासस्य प्रसंगो द्विसमा
सप्रसंग इति। राजगोक्षीरमित्यपि प्राप्नोति। नैवं भवितव्यं न भवितव्यं च यदा एतद्वाक्यं भवति गोः
क्षीरं गोक्षीरं। राज्ञो गोक्षीरं राजगोक्षीरमिति। यदा त्वेतद्वाक्यं भवति। राज्ञो गोः क्षीरमिति। तदा न
भवितव्यं। तदा च प्राप्नोति। तदा कस्मान्न भवति। सिद्धं तु राजविशिष्टाया गोः क्षीरेणासामर्थ्या
त्। सिद्धमेतत्। कथं। राजविशिष्टाया गोः क्षीरेण सह समासो भवति। न केवलायाः। किं वक्तव्यमे
तत्। न हि। कथमनुच्यमानं गंस्यते। यथैवायं गवि यतते तेन क्षीरमात्रेण संतोषकरोति। एवं रा
जन्यपि यतते राज्ञो या गौस्तस्या यत्क्षीरमिति। नैव वा पुनरत्र गो राजानमपेक्षमाणायाः क्षी
रेण सह समासः प्राप्नोति। कथं। असामर्थ्यात्। कथमसामर्थ्यं। सापेक्षमसमर्थं भवतीति। क
थं न हि गोः क्षीरमपेक्षमाणाया राज्ञा सह समासो भवति। प्रधानमत्र तदा गौर्भवति। भवति
च प्रधानस्य सापेक्षस्यापि समासः। अथ किमर्थं पदविधौ समर्थाधिकारः क्रियते। पदवि १०

भवतस्यैतावता सामर्थ्यं भवति। को विशेषो यत्गुणे पदार्थे सामर्थ्यं स्यात्। द्रव्ये वा न स्यात्। एष
विशेषः। एकं तयोरधिकरणं। अन्यच्च वीरत्वं गुणः। अन्यः [illegible]रुषत्वे द्रव्यपदार्थिकस्यापि तर्हि गुणा
भेदात् सामर्थ्यं भविष्यति। अशक्यो द्रव्यपदार्थिकेन द्रव्यस्य गुणात्कृत उपकारः प्रतिज्ञातुं। न नु यो
भ्यां नरो सौ भवति गुणः। यद्यप्यन्यं तरः न तु गम्यते। न हि गुड इत्युक्ते मधुरत्वं गम्यते। शृंगवेरमिति
वा कटुत्वं। गुणपदार्थिकेपि न त्वशक्यो गुणस्य द्रव्यकृत उपकारः प्रतिज्ञातुं। अथ गुणपदार्थिकः
प्रतिजानीते। द्रव्यपदार्थिकोपि कस्मान्न प्रतिजानीते। एवमनयोः सामर्थ्यं स्याद्वा न वा। क्वचना
वदिदं स्यात्समानाधिकरणेनेति। यत्र सर्वं समानं। इंद्रः शक्रः पुरुहूतः पुरंदरः। कंदुः कोष्ठः कुसूल
इति। नैवंजातीयकानां समासेन भवितव्यं प्रत्ययेन वोत्पत्तव्यं। किं कारणं। अर्थगत्यर्थः शब्दप्र
योगः। अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगे
णान भवितव्यं किं कारणं। उक्तार्थानामप्रयोग इति। न तर्हीदानीमिदं भवति। त्वत्यन्नरणीय इ

मा·द्वि· तिनैतौसमानार्थौ।एकोत्रशक्यार्थो।कृत्स्नोऽपरोर्द्धे।शक्योनच्छेत्तुमल्पःअर्हतिभर्तिंभरणीयःभर्त्तो
१२ भरणीभन्यभरणीयइति।यदितर्हियत्रकिंचित्समानंकश्चिच्चविशेष।तत्रनभवितव्यं।इहापित
र्हिप्राप्नोतिदर्शनीयायामातादर्शनीयामातेति।अत्रापिकिंचित्समानंकश्चिद्विशेषः।किंपुन
स्तत्सम्भावान्यभावौ।नकिंचित्सद्भावान्यभावोनस्तः।उच्यतेचेदंसमानेऽधिकरणेनेति।तत्रप्रक
र्षगतिर्विज्ञास्यते।यत्रसाधीयःसामानाधिकरण्यं।कचसाधीयःसामानाधिकरण्यं।यत्रसर्वं
समानंसम्भावान्यभावोदयंवा।अथवासमानाधिकरणेनेतिनसमानमाश्रीयते।यत्समानंभवति
नन्नतिवेतिनचैतत्समानंकिंचिदपिनभवति।अथवायावद्ब्रूयात्समानद्रव्येणेतितावत्समानाधिक
रणेनेति।इह्यहिलोकेधिकरणमित्युपपद्यते।तद्यथा।एकस्मिन्द्रव्येउदितंएकस्मिन्नधिकर
णेउदितंइतितथाव्याकरणेविप्रतिषिद्धंचानधिकरणवाचिअव्यवायीतिगम्यते।एवमपीद
मवश्यंकर्त्तव्यं।।समानाधिकरणमसमर्थवाद्भवतीति।किंप्रयोजनं।सर्पिःकालकं।यजुःपीत १२

कमित्येकमर्थ्येपदिसमानाधिकरणमसमर्थवद्भवतीत्युच्यते।सर्पिष्पीयते।यजुष्क्रियते।इत्यत्रष
त्वंनप्राप्नोति।आधात्वन्निहितमित्येवंनत्।एवंचकृत्वासमानाधिकरणेउपसंख्यानमसमर्थत्वात्तु
समानाधिकरणेउपसंख्यानंकर्त्तव्यं।वीरःपुरुषोवीरपुरुषइति।किंकारणमसमर्थत्वात्।नवावचन
प्रामाण्यात्।नवाकर्त्तव्यं।किंकारणं।वचनप्रामाण्यात्।वचनप्रामाण्यादत्रसमासोभविष्यति।किंवच
नप्रामाण्यं।समानमध्यममध्यमवीराश्चेति।उपाख्यातेषु च।उपाख्यातेषु चोपसंख्यानंकर्त्तव्यं।निष्कौ
शांबिः।निर्वाणणासिः।उपाख्यातेषु च किं।वचनप्रामाण्यादित्येव।किंवचनप्रामाण्यं।कुगतिप्रादयइ
ति।अस्यत्पदेनस्यवचनेप्रयोजनंकिं।सुराजा।अतिराजेति।ननुमोवृत्तिसूत्रवचनप्रामाण्यादिति।किंत
र्हिवात्तिकवचनप्रामाण्यादिति।सिद्धश्चाउत्स्वतिदुर्गतिवचनात्प्रादयःक्तार्थेइति।तदर्थगतेर्वा।तदर्थ
गतेर्वापुनःसिद्धमेतत्।किमिदंतदर्थगतेरिति।तस्यार्थस्तदर्थस्तदर्थस्यगतिःतदर्थगतिस्तदर्थगतेरिति।
यस्यार्थस्यकोशाव्यासामर्थ्येसतिसोयते।अथवासोर्थस्तदर्थःतदर्थस्यगतिस्तदर्थगतिःतदर्थगतेरि

मा॰ द्वि॰
१३

तियोर्थः। कोशाव्यासमर्थः स निसोवते। अथ यत्र बहूनां समासप्रसंगः किं तत्र द्वयोर्द्वयोः समास
आहोस्विद् विशेषेण। कश्चात्र विशेषः। समासो द्वयोर्द्वयोश्चेन् द्वंद्वे अनेकग्रहणं कर्त्तव्यं। चार्थे द्वंद्वोऽनेक
मिति वक्तव्यं। इहापि यथा स्यात्। प्लक्षन्यग्रोधखदिरपलाशा इति। नैष दोषः। अत्रापि द्वयोर्द्वयोः
समासो भविष्यति। द्वयोर्द्वयोः समासप्रसंग इति चेत् बहुषु द्वित्वाभावात् द्वयोर्द्वयोः समासप्रसंग
इति चेत् न। किं कारणं। बहुषु द्वित्वाभावात्। न बहुषु द्वित्वमस्ति। नावश्यमेवं विग्रहः कर्तव्यः। प्लक्षश्च
न्यग्रोधश्च खदिरश्च पलाशश्चेति। किं तर्ह्येवं विग्रहः करिष्यते प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ खदि
रश्च पलाशश्च खदिरपलाशौ। किं तर्ह्येवं विग्रहः करिष्यते प्लक्षश्च न्यग्रोधश्च प्लक्षन्य प्लक्षन्यग्रोधौ
च खदिरपलाशौ च प्लक्षन्यग्रोधखदिरपलाशा इति। होतृपोतृनेष्टोद्गातारस्तर्हि न सिध्यंति। हो
तापोतानेष्टोद्गाता इति वाक्ये प्राप्नोति। मा भूदेवं न वितव्यं यदेवं विग्रहः क्रियते होता च
पोता च होतापोतारौ नेष्टा चोद्गाता च नेष्टोद्गातारौ होतापोतारौ च नेष्टोद्गातारौ च होतापोतानेष्टोद्गातारौ च होतापोताय १३

नेष्टोद्गातारः। होतृपोतृनेष्टोद्गातारस्तर्हि न सिध्यंति। समासांतप्रतिषेधश्च। समासांतस्य च प्रतिषेधो
वक्तव्यः। वाक्त्वक्स्रुग्दृषदमिति। वाक्त्वचस्रुग्दृषदमिति प्राप्नोति। नैष दोषः। अत्रापि परेण सह स
मासो भविष्यति स्रुक्च दृषच्च स्रुग्दृषदं। त्वक्च स्रुग्दृषदं च त्वक्स्रुग्दृषदं। वाक्च त्वक्स्रुग्दृषदं च वाक्
त्वक्स्रुग्दृषदमिति। होतृपोतृनेष्टोद्गातार एवं तर्हि न सिध्यंति। इह च सुस्रुक्भगरकेशेन सुनता जिनवास
सा। समं नशितिरंध्रेण द्वयोर्द्वयोर्न सिध्यति। अस्तु तर्ह्यविशेषेण। अविशेषेण बहुव्रीहावनेकपदप्रस
गः। अविशेषेण बहुव्रीहावनेकपदस्य प्रसंगः। न तत्र को दोषः। तत्र स्वरसमासांतपुंवद्भावेषु दोषः। तत्र
स्वरसमासांतपुंवद्भावेषु दोषो भवति। स्वरः पूर्वशालाप्रियः। अपरशालाप्रियः। स्वरसमासांतः पंचग
लप्रियः। पंचनावप्रियः। समासांतः। पुंवद्भावः खादिरेतरशम्यरोरवेतरशम्यं। न चावयवतत्पुरुषत्व
त्। न तत्र एष दोषः। किं कारणं। अवयवतत्पुरुषत्वात्। अवयवो न तत्पुरुषसंज्ञः न दाम्ययोः समासांतपुं
वद्भावौ न भविष्यतः। स्वरः कथं। न स्यां तोदात्तत्वं विप्रतिषेधात्। अंतोदात्तत्वं क्रियतां पूर्वपदप्रकृ

तिस्वरइति।अंतोदात्तत्वंनवर्ततिविप्रतिषेधेनःनैषयुक्तोविप्रतिषेधः।विप्रतिषेधेपरमित्युच्यते।पू
र्वांतोदात्तत्वं।परंपूर्वपदप्रकृतिस्वरत्वं।नपरविप्रतिषेधंब्रूमः।किंतर्ह्यंतरंगविप्रतिषेधंब्रूमः।नि
मित्तस्वरबलीयस्त्वाद्वा।अथवानिमित्तस्वरान्निमित्तिस्वरोबलीयानितिवक्तव्यं।किंपुनर्निमित्तंकिं
वानिमित्ती।बहुव्रीहिर्निमित्तंतत्पुरुषोनिमित्ती।तत्रहिवक्तव्यं।निमित्तस्वरान्निमित्तिस्वरोबलीया
नितिनवक्तव्यं।एकशितिपात्स्वरवचनंतुज्ञापकंनिमित्तस्वरान्निमित्तिस्वरबलीयस्त्वस्ययदयंयुक्ता
रोह्यादिष्वेकशितिपाच्छब्दंपठतितज्ज्ञापयत्याचार्योनिमित्तस्वरान्निमित्तिस्वरोबलीयानिति।कःपु
नरर्हतियुक्तारोह्यादिष्वेकशितिपाच्छब्दंपठितुं।एवंकिलनामपठ्यते।एकःशितिरेकशितिः।एकशि
तिःपादोयस्येति।तद्वत्।एवंनग्रहःकरिष्यते।एकःशितिरेषुतइमेएकशितयः।एकशितयःपा
दायस्येति।कएकशितिपादिति।अथाप्येवंविग्रहःक्रियते।एकःशितिरेकशितिः।एकशितिःपा
दायस्येति।एवमपिनार्थःपाठेन।इगंतेद्विगावित्येषस्वरोबाधकोभविष्यति।अस्यतर्हिबहुव्रीह्यु १८

वयवस्यतत्पुरुषसंज्ञाप्राप्नोति।सुस्नातजटकेशेनमुनिनाजिनवाससासमंनशितिरंध्रेणेति
तत्रकोदोषः।नस्यांतोदात्तत्वंविप्रतिषेधादित्यंतोदात्तत्वंस्यात्।विप्रतिषेधेन।नैषदोषः।नेदंबहुव्री
ह्यवयवस्यतत्पुरुषस्यलक्षणमारभ्यते।किंतर्हियस्यबहुव्रीह्यवयवस्यतत्पुरुषस्यलक्षणमस्तितन
स्यांत्योंतोदात्तत्वंभविष्यतिविप्रतिषेधेन।नचवास्याप्यस्ति।किं।विशेषणं।विशेष्येणबहुलमिति
बहुलवचनान्नभविष्यति।अस्यतर्हिबहुव्रीह्यवयवस्यतत्पुरुषलक्षणमस्ति।अधिकषष्टिवर्षइ
ति।तत्रकोदोषः।तस्यांतोदात्तत्वंविप्रतिषेधादित्यंतोदात्तत्वंस्याद्विप्रतिषेधेन।नैषदोषः।इगंते
द्विगावित्येषस्वरोभविष्यति।यस्तर्हिनिगंतः।अधिकशतवर्षइति।इहचाप्यधिकषष्टिवर्षइतिस
मासांतःप्राप्नोति।उक्तमेतत्प्रकरणेसंख्यायास्तत्पुरुषस्योपसंख्यानंनिस्त्रिंशाद्यर्थमितिनैष
दोषः।अव्ययादेरित्येवंतत्।किंपुनःकारणमव्ययादेरित्येवंतत्।इहमाभूत्गोत्रिंशत्गोचत्वा
रिंशतइति।बहुव्रीहिसंज्ञानेहिप्राप्नोति।संख्ययाव्ययासन्नादूराधिकसंख्याःसंख्येयइतिनसं

ख्यां संख्येये वर्त्तयिष्यामः।कथं तत्रैवं विग्रहः करिष्यते।अधिका षष्टिर्वर्षाण्यस्येति।यथा तर्हि
सयोगप्रत्याख्यायते तथा पूर्वेण प्राप्नोति।कथं सयोगः प्रत्याख्यायते।अशिष्यः संख्योत्तरपदः
संख्येयवाची।तिधायित्वादिति प्रत्याख्यानेन तस्मिन्योगे संख्यां संख्येये वर्त्तयिष्यामः।तत्रैवं वि
ग्रहः करिष्यते।अधिका षष्टिर्वर्षाण्यस्येति।सर्वथा वयमधिकषष्टिवर्षाणां स्तुत्यामहे।कथं या
वता सयोगः प्रत्याख्यायते।अयं च विग्रहो न।अधिका षष्टिर्वर्षाण्यस्येति।यत्तु तदुक्तम
धिकषष्टिवर्षो सन्न सिध्यतीति सिद्धो भवति।कथं यावता सयोगः प्रत्याख्यायते।अयं विग्रहो
स्ति।अधिका षष्टिर्वर्षाण्यस्येति।अधिकशतवर्षस्तु न सिध्यति।कर्त्तव्योत्र यत्नः॥ इति श्रीम
द्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये द्वितीयाध्यायस्य प्रथमे पादे प्रथममाह्निकं॥ ॥
सुबामंत्रिते परांगवत्स्वरे॥ ॥सुबिति किमर्थं।करोष्यटन्नानेनदस्ति असामर्थ्यादत्र न भविष्य
ति।कथमसामर्थ्यं।समानाधिकरणमसमर्थवद्भवतीति।इदं तर्हि पीड्ये पीड्यमाना इवास्मि पु १५

हरणं करोष्यटन्।ननु चोक्तमसामर्थ्यादत्र न भविष्यतीति।कथमसामर्थ्यं।समानाधिकरणमसम
र्थवद्भवतीति।नैष दोषः।अधात्वभिहितमित्येवं तत्।आमंत्रितस्य परांगवद्भावे षष्ठ्यामंत्रितकारकव
चनं।आमंत्रितस्य परांगवद्भावे षष्ठ्यंतमामंत्रितकारकं च परांगवद्भवतीति वक्तव्यं।षष्ठ्यंतं तावत्।म
द्राणां राजन्।मगधानां राजन्।आमंत्रितकारकं।कुंडेनाटन्।नास्त्यत्र विशेषः सति वा परांगवद्भावे
असति वा।इदं तर्हि परशुना वृश्चन्।तन्निमित्तग्रहणं वा।अथ वा तन्निमित्तग्रहणं कर्त्तव्यं।आमंत्रित
निमित्तं परस्यांगवद्भवतीति वक्तव्यं।तच्चावश्यमन्यतरद्वक्तव्यं।अवचने हि सुबंतमात्रप्रसंगः।अ
नुच्यमाने ह्येतस्मिन्सुबंतमात्रस्य परांगवद्भावः प्रसज्येत।अस्यापि प्रसज्येत।दात्रेणाग्रे स्वाशुः
संग्रहस्वा।मित्रेणाग्रे मित्रधेयेयनस्व॥ किं पुनरत्र ज्यायः।तन्निमित्तग्रहणमित्येव ज्यायः।इदमपि सि
द्धं भविष्यति।गोषु स्वामिन्।पशुषु स्वामिन्।एतद्धि नैव षष्ठ्यंतं नाप्यामंत्रितकारकं।सुबंतस्य परां
गवद्भावे समानाधिकरणस्योपसंख्यानं अनंतरत्वात्।सुबंतस्य परांगवद्भावे समानाधिकरण

स्योपसंख्यानं कर्त्तव्यं। तीक्ष्णया सूच्या सीव्यन्। तीक्ष्णेन परशुना वृश्चन्। किं पुनः कारणं न सिध्य
ति। अनन्तरत्वात्। ननु च परस्य परांगवद्भावे कृते पूर्वस्यापि भविष्यति। स्वरेवधारणात्। स्वरेवध
रणादेवं न सिध्यति। स्वरेवधारणं क्रियते। नानन्तर्ये। परमपि च्छन्दसि। परममपि च्छन्दसि पूर्वस्यांग
वद्भवतीति वक्तव्यं। आ ते पितर्मरुतां सुम्नमेतु। प्रति त्वा दुहितर्दिवः। वृणी षड्ढ दुहितर्दिवः। अव्यय
प्रतिषेधश्च। अव्ययानां च प्रतिषेधो वक्तव्यः। उच्चैरधीयान। नीचैरधीयान। अनव्ययीभावस्या
व्ययीभावस्येति वक्तव्यं। इह मा भूत्। उपाग्न्यधीयान। प्रत्यग्न्यधीयान। अथ किमर्थं स्वरेवधा
क्रियते। स्वरेवधारणं सुब्लोपार्थं। स्वरेवधारणं क्रियते सुब्लोपो मा भूदिति। परशुना वृश्चन्
न वा सुबन्तैकान्तत्वात्। न वा कर्त्तव्यं। किं कारणं। सुबन्तैकान्तत्वात्। सुबन्तैकान्तः परांगवद्भावो भव
ति। प्रातिपदिकैकान्तस्तु सुब्लोपः। प्रातिपदिकैकान्तस्तत्र भवति सुब्लोपे कृते। प्रत्ययलक्षणेन सुब
न्तैकान्तता न्याय्यातः तस्मात्स्वरेऽवधारणं न कर्त्तव्यं सुब्लोपार्थं प्रातिपदिकस्यायं सुपो लुगुच्यते। १८

तस्मात्स्वरग्रहणेन नार्थः। इदं तर्हि प्रयोजनं षत्वणत्वे मा भूतामिति। कूपे सिंचन्। चर्मन् नमन्निति। ए
तदपि नास्ति प्रयोजनं। उक्तं तावत्कूपे सिंचन्निति। सात्पदाद्योरित्यत्र न भविष्यति। चर्मन् नमन्निति पूर्वपद
त्संज्ञायामग इत्येतस्मान्नियमान्न भविष्यति। ननु च समास एव भवति पूर्वपदमुत्तरपदमिति
नेत्याह। अविशेषेण भवति। पूर्वं पदं पूर्वपदमुत्तरं पदमुत्तरपदं॥ प्राक्कडारात्समासः॥ ॥प्राग्वच
ने किमर्थं। प्राग्वचनं संज्ञानिवृत्त्यर्थं। प्राग्वचनं क्रियते समाससंज्ञायाः निवृत्तिर्यथा स्यात्॥ अक्रिय
माणे हि प्राग्वचने अनवकाशाः अव्ययीभावादयः संज्ञाः समाससंज्ञां बाधेरन्। तां मा बाधिषतेति प्रा
ग्वचनं क्रियते। अथ क्रियमाणेऽपि हि प्राग्वचने अनवकाशा अव्ययीभावादिसंज्ञाः कस्मादेव न बाधन्ते॥
क्रियमाणे हि प्राग्वचने सत्यां समाससंज्ञायामनवकाशा अवयवसंज्ञा आरभ्यन्ते। तत्र वचनात्समावेशो भ
विष्यति। समाससंज्ञाप्यनवकाशा। सा वचनाद्भविष्यति। सावकाशा समाससंज्ञा। कोऽवकाशः। वि
स्पष्टादीन्यवकाशः। विस्पष्टं पटुः। विस्पष्टपटुः। व्यक्तं पटुः। निपातस्त्ववकाशः। एषा ह्याचार्यस्य शैली ल

च्यते येनैवावयवकार्यं भवति तेनैव समुदायकार्यमपि भवति। येनैवात्रावयवकार्यं स्वरस्तेनैव समु
दायकार्यमपि समासो भविष्यति विस्पष्टादीनि गुणवचनेष्विति। इदं तर्हि काकतालीयमजाकृपाणी
यं। एतदपि नास्ति प्रयोजनं। अत्रापि येनैवावयवकार्यं प्रत्ययोत्पत्तिः क्रियते तेनैव समुदायकार्यं
समाससंज्ञा भविष्यति समासाच्च तद्विषयादिति। इदं तर्हि पुना राजः पुनर्गवः। अत्राप्यवश्यं तत्पुरु
षसंज्ञा वक्तव्या। न तत्पुरुषाश्रयः समासान्तो यथा स्यात्॥ इदं तर्हि पुनराधेयं॥ अत्राप्यवश्यं गतिसंज्ञा
वक्तव्या। गतिकारकोपपदात्कृदित्येष स्वरो यथा स्यात्। इदं तर्हि पुनरुत्स्यूतं वासो देयं। अत्राप्यव
श्यं गतिसंज्ञा वक्तव्या। गतिर्गताविति निघातो यथा स्यात्। यदि तत्रास्ति पुनश्चनसौ छन्दसीति सति
तस्मिंस्तेनैव सिद्धं। एवमप्येकासंज्ञेति वचनान्नास्ति यौगपद्येन संभवः पर्यायः प्रसज्येत। तस्मा
त्साम्यवचनं कर्तव्यं॥ सह सुपा॥ ॥सहवचनं किमर्थं। सहवचनं पृथक्समासार्थं। सग्रहणं क्रि
यते। सहभूतयोः समाससंज्ञा यथा स्यात्। एकैकस्य समाससंज्ञा मा भूदिति। किं च स्यात् यद्येकै १७

कस्य समाससंज्ञा स्यात्। इह ऋक्पाद इति समासान्तः प्रसज्येत। उह राजाश्च इति द्वौ स्वरौ स्याताम्। कथं
कृत्वैकैकस्य समाससंज्ञा प्राप्नोति। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। तद्यथा वृद्धिगुणसंज्ञे प्रत्ये
कं भवतः। ननु चायमप्यस्ति दृष्टान्तः। समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दंड्यन्तामि
ति। अर्थिनश्च राजानो हिरण्येन भवंति न च प्रत्येकं दंडयंति। सत्येतस्मिन् दृष्टान्ते यदि तत्र प्रत्येकमि
त्युच्यते इहापि सहग्रहणं कर्तव्यं। अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः
इहापि नार्थः सहग्रहणेन। एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति तस्यैतत्प्रयोजनं योगांगं यथा
विज्ञायेत नासति योगे योगविभागः करिष्यते सह। सह सुप् समस्यते। केन समर्थेन। अनुव्यच
लत्। अनुप्राविशत्। ततः सुपा च सह सुप् समस्यते। अधिकारश्च लक्षणं च। यस्य समासस्या
न्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति। पुनरुत्स्यूतं वासो देयं। पुनर्निष्कृतो रथः। इवेन विभक्त्य
लोपः पूर्वपदप्रकृतिस्वरत्वं च। इवेन सह समासः विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं।

वाससीइवकन्येइव॥ ॥अव्ययीभाव॥ किमर्थमहतीसंज्ञा क्रियते॥ अन्वर्थसंज्ञायथाविज्ञा
येत॥ अनव्ययमव्ययंभवतीति अव्ययीभावः अव्ययीभावोव्ययसंज्ञोभवतीत्येतन्नवक्तव्यं॥ ॥अ
व्ययंविभक्ति॥ ॥इहकस्मान्नभवति सुमद्राः सुमगधाः सपुत्रः सछात्रइति। समृद्धौसाक
ल्यइतिवप्राप्नोति। नैषदोषः। इहकश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः। क
श्चिदन्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानः। पूर्वपदार्थप्रधानोव्ययीभावः। उत्तरपदार्थप्र
धानस्तत्पुरुषः। अन्यपदार्थप्रधानोबहुव्रीहिः। उभयपदार्थप्रधानोद्वंद्वः। नचात्रपूर्वपदार्थप्राधान्यं
गम्यते। अथवानेमेसमासार्था निर्दिश्यन्ते किंतर्हि अव्ययार्था इमे निर्दिश्यन्ते। एतेष्वर्थेषुयदव्ययं
वर्ततेतत्सुबंतेनसहसमस्यतइति॥ ॥यथासादृश्ये॥ ॥असादृश्यइति किमर्थं। यथादेवद
त्तस्तथायज्ञदत्तः। असादृश्यइत्युच्यते नचेदंनसिद्ध्यति। यथाशक्ति यथाबलमिति। किंकारणं
यथेत्ययंप्रकारवचनेथाल्। सचसादृश्येवर्तते। नैषदोषः। अयंयथाशब्दोस्त्येवाव्युत्पन्नंप्रातिप १९

दिकंवीप्सावाचि अस्तिप्रकारवचनेथाल्। तत्रयदव्युत्पन्नंप्रातिपदिकंवीप्सावाचितस्येदंग्रहणं।
अथयःप्रकारवचनेथाल् तस्येदंग्रहणंकस्मान्नभवति। पूर्वेणप्राप्नोति। सादृश्यसंपत्तीतिप्रति
षेधवचनसमासामर्थ्यान्नभविष्यति॥ ॥सुप्प्रतिनामात्रार्थे॥ ॥सुबितिवर्तमानेपुनःसुब्ग्रहणंकि
मर्थं। अव्ययमित्येवंतदभूत्सुममात्रेयथास्यात्। माषप्रतिसूपप्रतिशब्दनप्रति॥ ॥अक्षशलाका
अक्षादयस्तृतीयांताःपरिणा पूर्वोक्तस्ययथानतत्अयथाद्योतने अक्षादयस्तृतीयांताः परिणा
सहसमस्यंतइतिवक्तव्यं पूर्वोक्तस्ययथानतत्। अन्यथाजानीयके द्युते अक्षेणेदंनतथावृत्तंयथा
पूर्वमिति। अक्षपरिशलाकापरि। अक्षशलाकयोश्चैकवचनांतयोः अक्षशलाकयोश्चैकवचनां
तयोरितिवक्तव्यं। इहमाभूत्। अक्षाभ्यांवृत्तमक्षैर्वृत्तमिति। किंतवव्यवहारेच। कितवव्यवहारेइ
तिवक्तव्यं। इहमाभूत्। अक्षेणेदंनतथावृत्तं शकटेनयथापूर्वमिति॥ ॥विभाषाअपपरिबहि
रंचवः पंचम्यां॥ योगविभागःकर्त्तव्यः। विभाषेत्ययमधिकारः। ततः अपपरिबहिरंचवःपंचम्या

ति।पचमीग्रहणंशक्यमकर्त्तं।कथं।सुबंतेनेतिवर्त्तते।एतैश्चकर्म्मप्रवचनीयैर्योगेपंचमीविधी
यतेतत्रांतरेणापिपंचमीग्रहणंपंचम्यंतेनैवसमासोनविष्यति।इदंतर्हिप्रयोजनंबहिःश
ब्देनयोगेपंचमीनविधीयतेतत्रापियथास्यात्।बहिर्ग्रामं।बहिर्ग्रामात्।अथक्रियमाणेपि
पंचमीग्रहणेयावतावहिःशब्देनयोगेपंचमीनविधीयतेतत्रापियथास्यात्।बहिर्ग्रामात्।अ
थक्रियमाणेपिपंचमीग्रहणेयावताबहिःशब्देनयोगेपंचमीनविधीयतेकथमेवंतत्सिध्य
ति।पंचमीग्रहणसामर्थ्यात्॥ ॥आङ्मर्यादा॥ ॥मर्यादा॥ ॥मर्यादाविनिविधिग्रहणंश
क्यमकर्त्तुं।कथं।पंचम्यंतेनेतिवर्त्तते॥आङ्चकर्मप्रवचनीयेनयुक्तेपंचमीविधीयते।एतयो
श्चैवार्थयोरेङ्कर्मप्रवचनीयसंज्ञानान्यत्र॥ ॥यस्यचायामः॥ ॥किमुदाहरणं।अनुगंगंहास्ति
नपुरं।अनुगंगंवाराणसी॥अनुशोणंपाटलिपुत्रं।यस्यचायामइत्युच्यते।गंगाचायायता १९
हास्तिनपुरमप्यायतं।वाराणस्यप्यायता।तत्रकुतएतत्।गंगयासहसमासोनविष्यति।न

पुनर्हास्तिनपुरेणेति।नपुनर्वाराणस्येति।एवंतर्हिलक्षणेनेतिवर्त्तते।गंगाचैवहिलक्षणंनवा
राणसी॥अथवायस्यचायामइत्युच्यते।गंगाचाप्यायता।वाराणस्यप्यायता।तत्रप्रकर्षगतिर्वि
ज्ञायते॥साधीयोयस्यायामइति।साधीयश्चगंगायानवाराणस्यां॥ ॥तिष्ठद्गु॥ ॥किमर्थश्चक
रः॥एवकार्थः।तिष्ठद्गुप्रभृतीन्येवाव्ययीभूतपरमतिष्ठद्गु।तिष्ठद्गुकालविशेषे॥तिष्ठद्गुकालविशेषइतिव
क्तव्यंतिष्ठंतिगावोस्मिन्कालेतिष्ठद्गु॥वहद्गुखलेयवादनिप्रथमांतान्यन्यपदार्थे।खलेयवादीनिप्रथ
मांतान्यन्यपदार्थेसमस्यंतइतिवक्तव्यं।खलेयवं।खलेबुसं।लूनयवं।पूतयवं।प्रपमानयवं।लूय
मानयवं॥पारेमध्ये॥ ॥वावचनंकिमर्थं।विभाषासमासोयथास्यात्।समासेनमुक्तेवाक्यमपि
यथास्यात्।पारंगंगायाइति।नैतदस्तिप्रयोजनं।प्रकृतामहाविभाषातयावाक्यमपिनविष्यति
इदंतर्हिप्रयोजनं।अअव्ययीभावेनमुक्तेषष्ठीसमासोयथास्यात्।गंगापारमिति।एतदपिनास्ति
प्रयोजनं।अयमपिविभाषाषष्ठीसमासोपितावुभौवचनेनविष्यतः।अतउत्तरंपठति।पारम

ध्येषष्ठ्यावावचनंपरेमध्येषष्ठ्यावेतिवक्तव्यं।अवचनेहिषष्ठीसमासाभावो।यथैकदेशिप्रधाने
।अक्रियमाणेहिवावचनेषष्ठीसमासस्याभावःस्यात्।यथैकदेशिप्रधानेनह्येकदेशिसमा
सेनमुक्तेषष्ठीसमासोनभवति।किंपुनःकारणंएकदेशिसमासेनमुक्तेषष्ठीसमासोनभवति।
समासस्तद्धितानांवृत्तिर्विभाषावृत्तिविषयेतिव्यपवादः।इहपुनर्वावचनेक्रियमाणेएकया
वृत्तेर्विभाषाअपरयावृत्तिविषयेविभाषापवादः।एकारान्तनिपातनंकर्त्तव्यं।पारेगंगमिति
नकर्त्तव्यं।सप्तम्याअलुक्।सिद्धंभवेत्तिदंयदासप्तमीयदात्वन्याविभक्तिस्तदानसिद्ध्यति॥
नदीभिश्च॥ ॥नदीभिःसंख्यासमासेऽन्यपदार्थप्रतिषेधःनदीभिःसंख्यासमासेऽन्यपदार्थप्रति
षेधोवक्तव्यः।द्व्यीरावतीकोदेशः।त्र्यीरावतीकोदेशः।नदीभिःसंख्येतिप्राप्नोति।नवक्तव्यं।इहक
श्चित्समासःपूर्वपदार्थप्रधानः।कश्चिदुत्तरपदार्थप्रधानः।कश्चिदुभयपदार्थप्रधानः।कश्चिद
न्यपदार्थप्रधानः।उत्तरपदार्थप्रधानस्तत्पुरुषः।पूर्वपदार्थप्रधानोऽव्ययीभावः।अन्यपदार्थप्र २०

धानोबहुव्रीहिः।उभयपदार्थप्रधानोद्वंद्वः।नचात्रपूर्वपदार्थप्राधान्यंगम्यते॥ननुचयद्येनोच्य
तेसनतस्यार्थोभवति।अत्रवयमेताभ्यामेनमर्थमुच्यमानंपश्यामः।एतदेवनजानीमः।यद्येनोच्य
तेसतस्यार्थइति।अपिचान्यपदार्थप्रधानतानकल्प्येत।चित्रगुःशबलगुरिति।किंकारणं।अत्रा
पिवयमेताभ्यांशब्दाभ्यामेनमर्थमुच्यमानंपश्यामः।यद्यप्यत्रैताभ्यांशब्दाभ्यामेषोऽर्थउच्यतेअन्य
पदार्थोपितुगम्यते।तत्रान्यपदार्थाश्रयोबहुव्रीहिर्भविष्यतिनसिध्यति।इहापितर्हियद्यप्यन्यप
दार्थोऽत्रगम्यतेस्वपदार्थोपितुगम्यतेतत्रस्वपदार्थाश्रयोऽव्ययीभावःप्राप्नोति।एवंतर्हीदमिहस
प्रधार्यं।अव्ययीभावःक्रियतांबहुव्रीहिरितिवा।बहुव्रीहिर्भविष्यतिविप्रतिषेधेन।भवदेकसंज्ञा
धिकारेसिद्धं।परंकार्यत्वेतुनसिध्यति।आरंभसामर्थ्यादव्ययीभावःप्राप्नोति।परंकार्यत्वाच्च
बहुव्रीहिः।परंकार्यत्वेचनदोषः।नदीभिःसंख्यासमाहारेऽव्ययीभावोवक्तव्यः।सचावश्यंकर्त्तव्यः
सर्वमेकनदीतरं॥ ॥द्विगुश्च॥।द्विगोस्तत्पुरुषत्वेकानिप्रयोजनानि।द्विगोस्तत्पुरुषत्वेसमासां

ताःप्रयोजनं।द्विगोस्तत्पुरुषत्वे समासांताः प्रयोजयंति।पंचगवं।दशगवं।पंचराजं।दशराजं।।
द्वितीया श्रिता।श्रितादिषु गमिगाम्यादीनामुपसंख्यानं।श्रितादिषु गमिगाम्यादीनामुपसंख्यानं
कर्त्तव्यं।ग्रामंगमी ग्रामगमी।ग्रामंगामी ग्रामगामी।।श्रितादिभिरहीने द्वितीया समासवचनान
र्थक्यं बहुव्रीहिकृतत्वात्।श्रितादिभिरहीनवासिन्या द्वितीयायाः समासवचनमनर्थकं।किं कारणं।
बहुव्रीहिकृतत्वात्।इह यः कष्टं श्रितः कष्टमनेन श्रितं भवति तत्र बहुव्रीहिणा सिद्धं।अहीने द्वितीया
स्वरवचनानर्थक्यं च।अहीने द्वितीया पूर्वपदप्रकृतिस्वरं भवतीत्येतस्य स्वरवचनमनर्थकं।किं कार
णं।बहुव्रीहिकृतत्वादेव जातिस्वरप्रसंगः।जातिस्वरप्रसंगः प्राप्नोति।ग्रामगतः।आरण्य
गत इति।जातिकालसुखादिभ्योनाच्छादनात्क्तोकृतमितप्रतिपन्नाः इति।तत्र जातादिषु वा वचना
त्सिद्धं।परेतद्वाजान इति।एतद्वा जातादिष्विति वक्ष्याम्।मि इमे जातादयो न विषयं।तिनतु च भेदो भव
ति।बहुव्रीहौ सति समासांतोदात्तत्वेनापि भवितव्यं।पूर्वपदप्रकृतिस्वरत्वेनापि।तत्पुरुषत्वे स २१

ति पूर्वपदप्रकृतिस्वरत्वेनैव।नास्ति भेदः।यो पि हि तत्पुरुषमारभते न तस्य वंडवा रितो बहुव्रीहिः।
तत्र तत्पुरुषे सति द्वौ समासौ द्वौ स्वरौ।बहुव्रीहौ सति एकः समासो द्विस्वरत्वं।एवं तर्हि सिद्धे सति
यत्तत्पुरुषं शास्ति तत्ज्ञापयत्याचार्यः समानार्थे केवले विग्रहभेदाद्यत्तत्पुरुषः प्राप्नोति बहु
व्रीहिश्च तत्र तत्पुरुष एव भवतीति।किमेतस्य ज्ञापने प्रयोजनं।राज्ञः सखा राजसखः।राजा सखा
यस्येति बहुव्रीहिर्न भवति।नैतत् ज्ञापकसाध्यमपवादो वै रुत्सर्गा वाध्यंत इति वाधकेनानेन भवित
व्यं सामान्यविहितस्य विशेषविहितेन।अयं च सामान्यविहितः।यदुच्यते बहुव्रीहिकृतत्वादिति
एतदयुक्तं।अस्ति खल्वपि विशेषो बहुव्रीहेस्तत्पुरुषस्य च।किं शब्दकृतः अर्थकृतः।शब्दकृ
तश्च।शब्दकृतस्तावत्।बहुव्रीहौ सति कपा भवितव्यं।तत्पुरुषे सति न भवितव्यं।अर्थकृतस्तत्पु
रुषे सति रूढादीनां क्तः कर्त्तरि भवति धात्वर्थस्यानपवर्गो।आरूढो हस्तं देवदत्तः।बहुव्रीहौ व्य
यकृत्के कर्मणि भवति।आरूढो हस्तो देवदत्तेनेति।अन्यथाजातीयः खल्वपि प्रत्ययेनार्थम्

त्ययः । अन्यथाजातीयकः संबधात् । राज्ञः सखा । राजसखः । संबंधादेतल्लंतव्यं नूनं राजाप्यस्य
सखेति । तत्रायं स्वल्पमपीष्यते । स्वस्ति सोमसखा पुनरेहि गवां सख इति ॥ ॥ खट्वा क्षेपे ॥ ॥ किमुदाह
रणं । खट्वारूढः जाल्मः । क्षेप इत्युच्यते । कः क्षेपो नाम । अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वारोढ
व्याय इदानीमतोन्यथा करोति स उच्यते खट्वारूढोयं जाल्मो नानिवनवान् ॥ ॥ अत्यंत ॥ ॥ अ
त्यंतसंयोगे समासस्य । विशेषवचनात् कृतं समासवचनानर्थकं । अत्यंतसंयोगे समासस्यावि
शेषवचनात् क्रांतेन वाक्रांतेन त्वकालात् क्रान्तेनेत्येतत्समासवचनमनर्थकं । अत्यंतसंयोग इत्येव
सिद्धं । अनत्यंतसंयोगार्थं तु । अनत्यंतसंयोगार्थं तर्हीदं वक्तव्यं । षण्मुहूर्त्ताश्चराचराः ते कदाचिद्दिवं २१
ति कदाचिद्रात्रिं । अहर्गताः । रात्रिगताः । नैतदस्ति । गतग्रहणादप्येतत्सिद्धं । इदं तर्हि अहरतिसृताः ।
रात्र्यतिसृताः । मासप्रमितश्चंद्रमाः ॥ ॥ तृतीया तत् ॥ ॥ तत्कृतार्थेनेति । किमर्थं । दध्ना पटुः । नैत
दस्ति । असामर्थ्यादेवात्र न सिध्यति । कथमसामर्थ्यं । सापेक्षमसमर्थं भवतीति । न हि दध्नः पना २२

सामर्थ्यं । केन तर्हि भुजिना । दध्ना भुंक्ते पटुरिति । इहापि न तर्हि प्राप्नोति । शंकुलाखंडः किरिकारण इति
अत्रापि न शंकुलायाः खंडेन सामर्थ्यं । केन तर्हि कसेतिना । शंकुलया कृतः खंड इति । वचनाद्भविष्यति । इहा
पि तर्हि वचनात्प्राप्नोति । दध्ना पटुः घृतेन पटुरिति । तस्मात्तत्कृतार्थग्रहणं कर्त्तव्यं । गुणवचनेनेति किमर्थं
गोभिर्वपावान् । धान्येन धनवान् ॥ किं पुनरिहोदाहरणं । शंकुलाखंडो देवदत्त इति । कथं पुनर्गुणवच
निना समास उच्यमानो द्रव्यवचनेन स्यात् । इह तृतीया तत्कृतार्थेन गुणेनेतीयता सिद्धं । सोयमेवं सिद्धे स पं१
त्व ति यद्वचनग्रहणं करोति तस्यैतत्प्रयोजनं । एवं यथा विज्ञायेत गुणमुक्तवता गुणवचनेनेति । किं पुनर
यं गुणवचनः सन् द्रव्यवचनः संपद्यते ॥ आरभ्यते नञ् मतुब्लोपः । गुणवचनेभ्यो मतुपो लुगिति । तद्य
था शुक्लगुणः शुक्ल इति । कृष्णगुणः कृष्ण इति । एवं खंडगुणः खंडः । पद्येवं नार्थस्तत्कृतार्थग्रहणेन । अत्र ति
हि शंकुलायाः खंडेन सामर्थ्यं असामर्थ्याद्वात्र न भविष्यति । दध्ना पटुः घृतेन पटुरिति तस्मादर्थस्तत्कृ
तार्थग्रहणेन तृतीयासमासे अर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात् । तृतीयासमासेर्थग्रहणमन

र्थकं।किंकारणं।अर्थगतिर्ह्यवचनात्॥अन्तरेणापि वचनमर्थस्य गतिर्भविष्यति।निर्देश्यमिति चेन्न तृती-
यार्थनिर्देशोपि।अथैवमपि निर्देशः कर्त्तव्य इति चेत् तृतीयार्थनिर्देशोपि कर्त्तव्यः स्यात्।तदर्थकृतार्थे-
नेति वक्तव्य।तत्र हि वक्तव्यं न वक्तव्य।नायमनिर्देशः।किं तर्हि योगांगमिदं निर्दिश्यते।सति च योगांगे
योगविभागः करिष्यते।तृतीया तत्कृतेन गुणवचनेन समस्यते।ततोर्थेन।अर्थेन च तृतीया समस्य-
ते।धान्यार्थः।हिरण्यार्थः।पूर्वसदृशसमोनार्थ इत्यर्थग्रहणं न कर्त्तव्यं भवतीति॥पूर्वसदृश॥ ॥ ॥
पूर्वादिषु वरस्योपसंख्यानं।पूर्वादिषु वरस्योपसंख्यानं कर्त्तव्यं।मासावरोयं।संवत्सरावरोयं।स-
दृशग्रहणं उक्तं।किमुक्तं।सदृशग्रहणमनर्थकं तृतीयासमासवचनात्।षष्ठ्यर्थमिति चेत् तृती-
यासमासवचनानर्थक्यमिति॥कर्तृकरणे॥ ॥कर्तृकरणे कृता क्तेन।कर्तृकरणे कृता त्वेनेति वक्त-
व्य।अहिहतः।नखनिर्भिन्नः।कृता क्तेनेति किमर्थं।इह मा भूत्।दात्रेण लूनवान्।परशुना छिन्नवान्।
तत्र हि वक्तव्यं।बहुलवचनात्सिद्धं।कृत्यैः।कृत्यैरधिकार्थवचने न्यनापि दृश्यते कृत्यैरधिकार्थवचने २३

न्यत्रापि दृश्यत इति वक्तव्यं।बुसोपेंध्यं।तृणोपेंध्या।वनघात्यं।साधनकृतेति वपादहारकाद्यर्थं।अथवा साधनं कृ-
त्वा समस्यत इति वक्तव्यं।किंप्रयोजनं।पादहारकाद्यर्थं।पादाभ्यां ह्रियते पादहारकः।गलेचोपकः।गलेचोपका॥
अन्नेव्यननं॥भक्षेण मिश्रीकरणं॥ ॥अन्नेन व्यंजनं भक्ष्येण मिश्रीकरणमिति समर्थसमासः।अन्नेन व्यंजनं भक्ष्ये-
ण मिश्रीकरणमिति च समर्थसमासो इष्टव्यः।किंकारणं।कारकाणां क्रियासमर्थत्वात्।कारकाणां क्रियया सामर्थ्य-
मस्ति न तेषामन्योन्येन।अन्यथा निश्रयणाद्वाभ्यां काष्ठाभ्यां सामर्थ्यं न तेषां अन्योन्येन।एवं तर्ह्युपाहायं अन्नेन व्यंज-
नं भक्ष्येण मिश्रीकरणमिति।न वा सिसामर्थ्यं तत्र वचनात्समासो भविष्यति।वचनप्रामाण्यादिति चेन्नानाका-
रकाणां प्रतिषेधः।वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधो वक्तव्यः।तिष्ठतु दध्ना शुद्धनो देवदत्तेन भुज्य-
त इति॥सिद्धं तु समानाधिकरणाधिकारे उक्तः तृतीया पूर्वपदमुत्तरपदलोपश्च।सिद्धमेतत्कथं।समानाधिकरणाधिकारे
वक्तव्यं।क्तोनस्तृतीया पूर्वपदः समस्यते सुपा उत्तरपदस्य च लोपो भवतीति।दध्ना उपसिक्तः दध्युपसिक्तः।दध्युप-
सिक्त ओदनः दध्योदनः।गुडेन संसृष्टाः।गुडसंसृष्टा धाना गुडधानाः।षष्ठीसमासश्च युक्तपूर्णाभ्यां तः।षष्ठीसमासश्च यु-
क्तपूर्णाभ्यां तः समस्यते उत्तरपदस्य च लोपो वक्तव्यः।अश्वानां युक्तः अश्वयुक्तः।अश्वयुक्तो रथो अश्वरथः।दध्नः पूर्णो द-

।तथि पूर्णाः।दधिपूर्णो घटो दधिघटः॥ तत्तर्हीदं वक्तव्यं।न वा समासे दर्शनात्।न वा वक्तव्यं। किं कारणं। असमा-
से दर्शनात्।यच्च समासे दृश्यते समासे च न दृश्यते न तद्विलोपारंभं प्रयोजयति।न वा समासेन प्रसिक्तशब्दः संसृष्ट-
शब्दो युक्तशब्दः पूर्णशब्दो वा दृश्यते।कथं तर्हि सामर्थ्याद्गम्यते।युक्तार्थसंप्रत्ययाच्च सामर्थ्यं।दध्यायुक्तार्थता संप्रती-
यते।कथं पुनर्ज्ञायते।दध्यायुक्तार्थता संप्रतीयत इति।संप्रत्ययाच्च न दर्शाध्यवसीनं संप्रत्ययाच्च न दर्शाध्यवसीयते।
अवश्यं चैतदेवं विज्ञेयं संप्रतीयमानार्थलोपेऽव्यवस्था।यो हि मन्यते संप्रतीयमानार्थानां शब्दानां लोपो भवतीत्य-
नवस्था लोपेऽस्य स्यात्।दध्नान्तु के च बहवोऽर्था गम्यंते।मंदकमुत्तरकं निलीनकमिति तिनद्दा विनां शब्दानां लोपो वक्तव्यः
स्यात्।तथा गुड इत्युक्ते मधुरशब्दस्य शृंगवेरमिति च कटुकशब्दस्य।अंतरेणापि खलु शब्दप्रयोगं बहवोऽर्था गम्यं-
ते।अक्षिनिकोचैः पाणिविहारैश्च तद्वा विनां शब्दानां लोपो वक्तव्यः स्यात्॥ ॥चतुर्थी॥ ॥किं चतुर्थ्यंतस्य तदर्थमा-
त्रेण समासो भवति।एवं भवितुमर्हति।चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसंगो विशेषात्।चतुर्थी तदर्थमात्रेण चेत्सर्व-
प्रसंगः सर्वस्य चतुर्थ्यंतस्य तदर्थमात्रेण सह प्रसंगो भवति समासः प्राप्नोति।अनेनापि प्राप्नोति।रंधनाय स्था-
ली।अवहननायोलूखलमिति।किं कारणं। अविशेषात्।न हि कश्चिद्विशेष उपादीयते।एवंजातीयकस्य चतुर्थी २४

तस्य तदर्थेन सह समासो भवतीति।अनुपादीयमाने विशेषे सर्वप्रसंगः।बलिरक्षिताभ्यां चानर्थकं वचनं बलिर-
क्षिताभ्यां च समासवचनमनर्थकं।योऽपि हि महाराजाय बलिः स महाराजार्थो भवति तत्र तदर्थ इत्येव सिद्धं।यदि पु-
नर्विकृतिश्चतुर्थ्यंता प्रकृत्या समस्यत इत्येतल्लक्षणं क्रियेत।विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानं।वि-
कृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानं कर्तव्यं।अश्वघासः।श्वश्रूसुरं हस्तिविधेति।अर्थेन नित्यसमास-
वचनं।अर्थशब्देन नित्यसमासो वक्तव्यः।ब्राह्मणार्थं।क्षत्रियार्थं।किं विकृतिश्चतुर्थ्यंता प्रकृत्या समस्यत इत्यत-
ऽर्थेन नित्यसमासो वक्तव्यः।नेत्याह सर्वथार्थेन नित्यसमासो वक्तव्यः विग्रहो माभूदिति।सर्वलिंगता च।सर्वलिं-
गता च वक्तव्या।ब्राह्मणार्थं पयः।ब्राह्मणार्थः सूपः।ब्राह्मणार्था यवागूः।किमर्थेन नित्यसमासश्च यत इत्यतः
सर्वलिंगता वक्तव्या।नेत्याह।सर्वथा सर्वलिंगता वक्तव्या॥ किं कारणं।यावता अर्थशब्दोऽयं पुल्लिंगः।उत्तरप-
दार्थप्रधानः तत्पुरुषः।तेन पुल्लिंगस्यैव समासस्याभिधानं स्यात्।स्त्रीनपुंसकलिंगस्य न स्यात्।तत्तर्हीदं व-
क्तव्यं।विकृतिः प्रकृत्येति वक्तव्यं।अश्वघासादीनामुपसंख्यानं कर्तव्यं।अर्थेन नित्यसमासो वक्तव्यः।सर्व-
लिंगता वक्तव्या।न वक्तव्यं।यत्तावदुच्यते विकृतिः प्रकृत्येति वक्तव्यमिति।न वक्तव्यं।आचार्यप्रवृत्तिर्ज्ञापयति

विकृतिश्चतुर्थ्यंता प्रकृत्या सह समस्यत इति यदयं बलिरक्षितग्रहणं करोति । तत्कथं कृत्वा ज्ञापकं यथा जाती-
यकानां समासे बलिरक्षितग्रहणेनार्थः तथा जातीयकानां समासः । यदि च विकृतिश्चतुर्थ्यंता प्रकृत्या समस्य-
ते न तदर्थमात्रेण ततो बलिरक्षितग्रहणमर्थवद्भवति । यदप्युच्यते अश्वघासादीनामुपसंख्यानं कर्त्तव्यमि-
ति । न कर्त्तव्यं । अश्वघासादयः षष्ठीसमासा भविष्यंति । यद्यपि यदर्थं भवति अयमपि तत्रास्ति संबंधो भवत्यस्येदमिति
तद्यथा गुरोरिदं गुर्वर्थमिति न तु स्वरे भेदो भवति । चतुर्थीसमासे सति पूर्वपदप्रकृतिस्वरत्वेन भवितव्यं । षष्ठीसमासे
पुनरंतोदात्तत्वेन । नास्ति भेदः । चतुर्थीसमासेपि सत्यंतोदात्तत्वेनैव भवितव्यं । कथं । आचार्यप्रवृत्तिर्ज्ञापयति विकृति-
श्चतुर्थ्यंता प्रकृतिस्वरा भवति न चतुर्थीमात्रमिति । यदयं चतुर्थी तदर्थे । अर्थे । क्ते चेत्यर्थग्रहणं क्तग्रहणं च करोति ।
कथं कृत्वा ज्ञापकं यथा जातीयकानां प्रकृतिस्वरत्वे अर्थग्रहणेन क्तग्रहणेन चार्थः तथा जातीयकानां प्रकृतिस्वरत्वं
यदि च विकृतिश्चतुर्थ्यंता प्रकृत्या भवति न चतुर्थीमात्रं ततो ऽर्थग्रहणं क्तग्रहणं चार्थवद्भवति । यदप्युच्यते ऽर्थेन नित्य-
समासो वक्तव्य इति । न वक्तव्यः सर्वप्रत्ययः करिष्यते । किं कृतं भवति न चैव हि कदाचित्प्रत्ययेन विग्रहो भवति । अ-
पि च सर्वलिंगता सिद्धा भवति । यदि च सर्वप्रत्ययः क्रियते इदं संज्ञा न प्राप्नोति । अथापि कथंचिदिदं संज्ञा स्यात् एवम् २५

पीदमर्थं । अर्थं अंगस्यनीयङुच्चङोस्यातां । एवं तर्हि बहुव्रीहिर्भविष्यति । किं कृतं भवति भवति चैव कश्चिदस्वपदवि-
ग्रहो बहुव्रीहिः । शोभनं सुखमस्याः सुमुखा इति नैवं शक्यं इह हि महदर्थमित्यात्त्वकपौ प्रसज्येयातां । एवं तर्हि तदस्यो-
त्तरपदस्यार्थशब्द आदेशः करिष्यते । किं कृतं भवति न चैव हि कदाचिदादेशेन विग्रहो भवति । अपि च । सर्वलिंगता सि-
द्धा भवति । तत्र हि वक्तव्यं न वक्तव्यं । योगविभागः करिष्यते । चतुर्थी सुबंतेन सह समस्यते । ततस्तदर्थार्थं । तदर्थस्यो-
त्तरपदस्यार्थशब्द आदेशो भवति इहापि तर्हि समासः प्राप्नोति । छात्राय रुचितं । छात्राय स्वदितमिति । आचार्यप्रवृत्ति-
र्ज्ञापयति । तादर्थ्ये या चतुर्थी सा समस्यते न चतुर्थीमात्रमिति । यदयं हितसुखग्रहणं करोति । कथं कृत्वा ज्ञापकं
यथा जातीयकानां समासे हितसुखग्रहणेनार्थस्तथा जातीयकानां समासः । यदि च तादर्थ्ये चतुर्थी सा सम-
स्यते न चतुर्थीमात्रं ततो हितसुखग्रहणमर्थवद्भवति । इहापि तदर्थस्योत्तरपदस्यार्थशब्द आदेशः प्राप्नोति । यू-
पाय दारु यूपदारु रथाय दारु रथदारु । वा वचनं । वाव विधास्यते । इहापि तर्हि प्राप्नोति विभाषा । ब्राह्मणार्थं क्ष-
त्रियार्थमिति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति । प्रकृतिविकृत्योर्यः समासस्तत्र तदर्थस्योत्तरपदस्य चार्थशब्द आ-
देशो भवति । अन्यत्र नित्य इति । यदयं बलिरक्षितग्रहणं करोति । एवं तर्ह्युदकार्थो वीवधः स्यान्निवध्नावाडुदभावः प्र-

प्नोति।तस्मान्नेदं शक्यं।न चेदेवं।अर्थेन नित्यसमासो वक्तव्यः।सर्वलिंगता च।नैष दोषः।इदं तावदयं प्रष्टव्यः।अथेह
ब्राह्मणेभ्य इति किंभावा चतुर्थी।तादर्थ्य इत्याह॥ यदि तादर्थ्ये चतुर्थी अर्थशब्दस्य प्रयोगेण न भवितव्यं।तदर्थो नाम
प्रयोग इति।समासोपि न हि न प्राप्नोति।वचनात्समासो भविष्यति।यदप्युच्यते।सर्वलिंगता वक्तव्येति।न वक्तव्या
लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य चतुर्थी॥ पंचमी भयेन॥ ॥अल्पमिदमुच्यते भयेनेति।भयभीतभीतिभी
भिरिति वक्तव्यं।वृकाद्भयं।वृकभयं।वृकभीतः।वृकभीतिः।वृकभीः।अपर आह।भयनिर्गतजुगुप्सुभिरिति वक्तव्यं।
वृकभयं।ग्रामनिर्गतः।अधर्मजुगुप्सुः।पंचमी॥ ॥सप्तमी शौंडैः॥ ॥शौंडादिभिरिति वक्तव्यं।इहापि यथा
स्यात्।अक्षधूर्तः।स्त्रीधूर्तः।अक्षकितवः।स्त्रीकितव इति।तन्न हि वक्तव्यं।न वक्तव्यं।बहुवचननिर्देशाच्छौंडादिभि
रिति विज्ञास्यते।सप्तमी॥ ॥ध्वांक्षेण क्षेपे॥ ॥ध्वांक्षेणेत्यर्थग्रहणं।ध्वांक्षेण क्षेपेऽर्थग्रहणं कर्तव्यं।इहापि यथा
स्यात्।तीर्थकाक इति।क्षेप इत्युच्यते।क इह क्षेपो नाम।यथा तीर्थकाका न चिरं स्थातारो भवन्ति।एवं यो गुरुकुलं
गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाक इति॥ ध्वांक्षे॥ ॥कृत्यैर्ऋणे॥ ॥कृत्यैर्नियोगे यद्ग्रहणं।कृत्यैर्नियोग इति
वक्तव्यं।इहापि यथा स्यात्।पूर्वाह्णे गेयं साम।प्रातरध्येयोऽनुवाक इति।तन्न हि वक्तव्यं।न वक्तव्यं।ऋण इत्येव सि २८

द्धं।इह यद्यस्य नियोगतः कार्यमृणं तस्य तद्भवति॥ तत्र ऋण इत्येव सिद्धं।यद्ग्रहणं च कर्तव्यं।इह मा भूत्।पूर्वाह्णे दा
तव्या भिक्षेति॥ कृत्यैः॥ ॥क्षेपे॥ ॥किमुदाहरणं।अवतप्तेनकुलस्थितं त एतत्।क्षेप इत्युच्यते॥ क इह क्षेपो नाम।
यथा अवतप्ते नकुला न चिरं स्थातारो भवन्ति॥ एवं कार्याण्यारभ्य यो न चिरं तिष्ठति स उच्यते अवतप्तेनकुलं स्थि
तं त एतदिति।क्षेपे सप्तम्यंतं क्तांतेन समस्यते तत्रत्ते सगतिकेन सनकुलेन समासो न प्राप्नोति।क्षेपे नक्तं।किमुक्तं।
कृद्ग्रहणे गतिकारकपूर्वस्यापीति।क्षेपे॥ ॥पात्रेसमितादयश्च॥ ॥किमर्थश्चकारः।एवकारार्थः।पात्रेसमिता
दय एव।किं मा भूत्।परमं पात्रेसमिता इति॥ पात्रेसमिता॥ ॥पूर्वकालैक॥ ॥इह कस्मादव्ययीभावो न भवति।
एकनदी।नदीभिश्चेति प्राप्नोति।इह कश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदा
र्थप्रधानः कश्चिदुभयपदार्थप्रधानः।पूर्वपदार्थप्रधानोऽव्ययीभावः।उत्तरपदार्थप्रधानस्तत्पुरुषः।अन्यपदार्थप्रधानो
बहुव्रीहिः।उभयपदार्थप्रधानो द्वंद्वः।न चात्र पूर्वपदार्थप्राधान्यं गम्यते।अथ वाऽव्ययीभावः क्रियतां तत्पुरुष इति
तत्पुरुषो भविष्यति विप्रतिषेधेन।न वेदेकसंज्ञाधिकारे सिद्धं।परं कार्यत्वे तु न सिध्यति।आरंभसामर्थ्याच्चाव्ययीभा
वः प्राप्नोति।परं कार्यत्वाच्च तत्पुरुषः प्राप्नोति।परं कार्यत्वे च न दोषः।कथं नदीभिः समाहारेऽव्ययीभावो वक्तव्यः।स

र्वमेकनदीतरे॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे द्वि
तीयमाह्निकं॥ ॥तद्धितार्थोत्तरपदसमाहारे च। समाहार इति कोयं शब्दः। समाङ्पूर्वाद्धरतेः कर्मसाधनो घञ्।
समाह्रियते समाहार इति। यदि कर्मसाधनः पंचकुमार्यः समाहृताः पंचकुमारि दशकुमारि। गोस्त्रियोरुपसर्ज
नस्येति ह्रस्वत्वं न प्राप्नोति द्विगुरेकवचनमित्येतन्न वक्तव्यं। एवं तर्हि भावसाधनो भविष्यति॥ समाहरणं समाहारः
।अथ भावसाधने सति किमभिधीयते। यत्तदोत्तराधर्यकं पुनर्गवां समाहारः। पादर्जनक्रमणं निष्क्रमणमपहरणं
वा। यद्येवं दिक्षिप्तेषु पूलेषु गोषु चरंतीषु न सिध्यति। एवं तर्हि समभ्याशीकरणं समाहारः। एवमपि पंचग्रामी। षण्न
गरीति न सिध्यति किं कारणं। समेकत्ववाची आङभिमुख्ये वर्त्तते। हरतिर्देशांतरप्रापणे। नावश्यं हरतिर्देशांतर
प्रापण एव वर्त्तते। किं तर्हि सादृश्येपि वर्त्तते। तद्यथा मातुरनुहरति। पितुरनुहरतीति॥ अथवा पंचग्रामी। षण्ण ग
रीत्रिपुरीति। नैवेदमियत्त्वे वावतिष्ठते। अवश्यमसौ ततः किंचिदाकांक्षति। क्रियां गुणं वा यदाकांक्षति तदेकं सवस
माहारः। अयं तर्हि भावसाधने सति दोषः। पंचपूलीमानय। इति भावानयने चोदिते द्रव्यानयनं न प्राप्नोति
नैष दोषः। इदं तावदयं प्रष्टव्यः। यथेह गोरनुबंध्योजोऽग्नीषोमीय इति कथमालंभनचोदितायां द्रव्ये आरंभणालं २९

भनप्रोक्षणविशसनादीनि क्रियंत इति। असंभवात्॥ आलंभने आरंभणादीनां संभवो नास्तीति कृत्वा आकृतिसह
चरिते द्रव्ये आरंभणादीनि क्रियंते। इहाप्यर्थ एवंजातीयकं भवति। असंभवात् भावानयनस्य द्रव्यानयनं भविष्यति। अथवा अ
व्यतिरेकात् द्रव्याकृत्योः। किं पुनर्द्विगुसंज्ञा प्रत्ययोत्तरपदयोर्भवति। एवं भवितुमर्हति। द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदि
तरेतराश्रयत्वादप्रसिद्धिः। द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः। का इतरेतराश्रयता। द्विगुसंज्ञा
निमित्ते प्रत्ययोत्तरपदे प्रत्ययोत्तरपदनिमित्ता च द्विगुसंज्ञा तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न
प्रकल्पंते। एवं तर्ह्यर्थ इति वक्ष्यामि। अर्थे चेत् द्विगावुत्पत्तिर्बहुव्रीहिवत्। अर्थे चेद् द्विगोरुत्पत्तिर्न प्राप्नोति द्वैमातुरः पांचन
पितिः किं कारणं। द्विगुनोक्तत्वात्। बहुव्रीहिवत्। तद्यथा चित्रगुः शबलगुरिति बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न
भवति। एवं तर्हि समासतद्धितविधाविति वक्ष्यामि। समासतद्धितविधाविति चेदन्यत्र समाससंज्ञाभावः। समासतद्धि
तविधाविति चेदन्यत्र समाससंज्ञा न प्राप्नोति। क्वान्यत्र। स्वरे। पंचारत्निः दशारत्निः। इगन्ते द्विगाविति एष स्वरो न प्राप्नोति। सि
द्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात्। सिद्धमेतत्। कथं। प्रत्ययोत्तरपदयोश्चेति वचनात्। प्रत्ययोत्तरपदयोर्द्विगुसंज्ञा भवती
ति वक्तव्यं। ननु चोक्तं द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिरिति। नैष दोषः। इतरेतराश्रयमात्रमेतच्चो

दितं।सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि।सिद्धं तु नित्यशब्दत्वादिति।नेदं तुल्यमन्येतरेतराश्रयैः।न हि संज्ञा नि
त्या।एवं तर्हि भाविनी संज्ञा विज्ञास्यते।तद्यथा।कश्चित्कंचित्तंतुवायमाह।अस्य सूत्रस्य शाटकं वयेति।स पश्यति।यदि
शाटको न वातव्यः अथ वातव्यो न शाटकः।शाटको [illegible] वातव्यश्चेति विप्रतिषिद्धं।भाविनी खल्वस्य संज्ञाभिप्रेता स मन्यते
स वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति।एवमिहापि तस्मिन्द्विगुर्भवति।यस्याभिनिर्वृत्तस्य प्रत्ययस्योत्तरपदमि
ति चैतत्संज्ञेन विष्यतः।अथवा पुनरस्त्वर्थ इति न तु वाक्यमर्थे च तद्धितानुत्पत्तिर्बहुव्रीहिवदिति नैष दोषः।नावश्यम
र्थशब्दोभिधेय एव वर्त्तते।किं तर्हि स्यादर्थेपि वर्त्तते।तद्यथा।दारार्थं घटामहे।धनार्थं न्रूमहे।दारैर्नः स्युः।धनानि नः
स्युरिति।एवमिहापि तद्धितार्थे द्विगुर्भवतीति तद्धितः स्यादिति।द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः।अथवा पदयद्वि
लृष्ट गोर्लुगनपत्य इति द्विगोरुत्तरस्य तद्धितस्य लुकं शास्ति तज्ज्ञापयत्याचार्यो भवत्यत्र द्विगोस्तद्धित इति समाहारसमूहयो
रविशेषात्समाहारग्रहणमनर्थकं तद्धितार्थेन कृतत्वात्।समाहारः समूह इति अविशिष्टावेतावर्थौ।समाहारसमूहयो
२ [illegible]रविशेषात्समाहारग्रहणमनर्थकं।किं कारणं।तद्धितार्थेन कृतत्वात्।तद्धितार्थे द्विगुरित्येवमत्र द्विगुर्भविष्यति।य
दि तद्धितार्थे द्विगुरित्येवमत्र द्विगुर्भवति तद्धितोत्पत्तिः प्राप्नोति।तत्र प्याद्यलां लुग्भविष्यति।लुक्कृतानि प्राप्नुवंति।का २८

नि।पंचपूलीदशपूली।अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकीति प्रतिषेधः प्राप्नोति।पंचगवं।दशगवं।गोरतद्धि
तलुकीति टच्न प्राप्नोति।नैष दोषः।अविशेषेण द्विगोर्ङीप्भवतीत्युक्त्वा अपरिमाणबिस्ताचितकंबल्येभ्यः समाहार इति
वक्ष्यामि तन्नियमार्थं भविष्यति।समाहार एव नान्यत्रेति।गोरकारो द्विगोः समाहारे अविशेषेण द्विगोष्टज्भवतीत्युक्त्वा द्वि
गोः समाहार इति वक्ष्यामि तन्नियमार्थं भविष्यति समाहार एव नान्यत्रेति।अभिधानार्थं तु।अभिधानार्थं तु समाहारग्रहणं कर्त
व्यं।समाहारेणाभिधानं यथा स्यात्तद्धितार्थेन मा भूदिति।किं च स्यात्।तद्धितोत्पत्तिः प्रसज्येत।तत्र प्याद्यलां लुग्भविष्यति।लु
क्कृतानि प्राप्नुवंति।सर्वाणि परिहृतानि।न सर्वाणि परिहृतानि।पंचकुमारि।दशकुमारि।लुक्तद्धितलुकीति ङ्यापोर्लुक्प्रस
ज्येत।द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं।द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासो वक्तव्यः।वाक्दृषदप्रियः।छत्रोपा
नहप्रियः।पंचगवप्रियः।दशगवप्रियः।किं प्रयोजनं।समुदायद्वन्द्वाचवाक्यवानोमाकृदविदप्यहत्तिर्भूदिति।तत्र हि वक्तव्यं।इह
पक्षे वृत्तिः पक्षे वाक्यं यदा वृत्तिः पक्षे तदा सर्वेषामेव वृत्तिः।यदा वाक्यं पक्षे तदा सर्वेषामवृत्तिः।उत्तरपदेन परिमा
णिना द्विगोः समासवचनं।उत्तरपदेन परिमाणिना द्विगोः समासो वक्तव्यः।द्विमासजातः।त्रिमासजातः।किं पुनः कारणं न
सिध्यति।सुप्सुपेति वर्त्तते।एवं तर्हीदं स्यात्।द्वौ मासौ द्विमासं द्विमासं जातस्येति।नैवं शक्यं।स्वरे हि दोषः स्यात्।द्विमासजा
त इति प्राप्नोति।द्विमासजात इति चेष्यते।द्यहजातश्च न सिध्यति।द्यहजात इति प्राप्नोति।न चैवं विग्रहः कर्तव्यः।न विग्रहं च यद्य

समाहारे द्विगुः।द्वन्द्वेनातस्तेन सिध्यति।किमुच्यते परिमाणिनेति पुनरन्यत्रापि।पंचगवप्रियः।दशगवप्रियः।अ
न्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः।अन्यत्र समुदायो बहुव्रीहिसंज्ञः।अन्यत्र समुदायबहुव्रीहित्वाद्बहुव्रीहि
त्वादुत्तरपदं प्रसिद्धं।उत्तरपदे प्रसिद्धे नोत्तरपदमिति द्विगुर्न भविष्यति।सर्वत्र मत्वर्थे प्रतिषेधः।सर्वेषु मत्वर्थेषु द्विगुसंज्ञा
या मत्वर्थे प्रतिषेधो वक्तव्यः।किं प्रयोजनं।पंचखट्वो दशखट्वः।द्विगोरितीकारो मा भूत्।पंचगुर्दशगुः।गोरतद्धित
लुकीति टच् मा भूदिति।न द्वितार्थे॥ ॥संख्यापूर्वो द्विगुः॥ ॥किमनंतरयोगे यः संख्यापूर्वः स द्विगुसंज्ञः।आहो
स्वित्पूर्वमात्रे।किंचातः।यद्यनंतरयोगे एकशाटीति द्विगोरितीकारो न प्राप्नोति।अथ पूर्वमात्रे एकनिष्का अत्रापि
मे प्राप्नोति।अस्त्वनंतरो।कथमेकशाटी।ईकारांतेन समासो भविष्यति।एकशाटी एकशाटी।इह तर्ह्येकारूपी द्विगो
रितीकारो न प्राप्नोति।अस्तु तर्हि पूर्वमात्रे।कथमेकनिष्का।टाबंतेन सह समासो भविष्यति।एकानिष्का।एकानिष्का।
इदं तर्हि।सप्तर्षयः।इगंते द्विगाविति एष स्वरः प्राप्नोति।अस्तु तर्ह्यनंतरे।कथमेकरूपी।समाहार इत्येव सिद्धं।कः पुनरत्र
समाहारः।यत्र ह्रानसंभ्रमो वा।इह तर्हि पंचहोतारो दशहोतारः।इगंते द्विगाविति एष स्वरो न प्राप्नोति।अस्तु तर्हि पूर्वमात्रे।
कथं तर्हि सप्तर्षयः।अंतोदात्तप्रकरणे त्रिचक्रादीनां छंदसीत्येवमेतत्सिद्धं।अथवा पुनरस्त्वनंतरे।कथं पंचहोतारो द २९

शहोतारः।आद्युदात्तप्रकरणे दिवोदासादीनां छंदसीत्येव सिद्धं।संख्या।कुत्सितानि॥ ॥किमुदाहरणं।वैयाकरणविः
किं व्याकरणं कुत्सितं आहोस्विद्वैयाकरणः।वैयाकरणः कुत्सितः।तस्मिन्कुत्सितं भवति कुत्सितानि॥ ॥उपमानानि॥
उपमानानीत्युच्यते॥कानि पुनरुपमानानि।किं यद्देवोपमानं तद्देवोपमेयं।आहोस्विदन्यदुपमानं अन्यदुपमेयं।किं चातः।
यदि यद्देवोपमानं तद्देवोपमेयं।क इहोपमार्थः।गौरिव गौरिति।अथाप्यन्यद्देवोपमानं अन्यद्देवोपमेयं।क इहोपमार्थः।गौरि
वाश्व इति।एवं तर्हि यत्र किंचित्सामान्यं कश्चिच्च विशेषः तत्रोपमानोपमेये भवतः।किं वक्तव्यमेतत्।न हि कथमनुच्यमानं
गंस्यते।मानं हि नाम अनिर्ज्ञातज्ञानायोपादीयते।अनिर्ज्ञातमर्थं ज्ञास्यामीति।तत्समीपे यन्नात्यंतं।यन्मिमाने तदुपमानं।गौरि
व गवय इति।गौर्निर्ज्ञातः।गवयोऽनिर्ज्ञातः।कोऽमेतन्नैव हेतुना यस्य गवयो निर्ज्ञातः स्यात् गौरनिर्ज्ञातः तेन कर्त्तव्यं स्यात्।
गवय इव गौरिति।तावत्कर्त्तव्यं।किं पुनरिहोदाहरणं।शस्त्रीश्यामा।का पुनरयं श्यामाशब्दो वर्त्तते।शस्त्र्यामित्याह।केन तर्हीदा
नीं देवदत्ता निधीयते।समासेन।यद्येवं शस्त्रीश्यामो देवदत्त इति न सिध्यति।उपसर्जनस्येति ह्रस्वत्वं भविष्यति।यदि तर्ह्युपस
र्जनानामप्येवं जातीयका निवर्तंते।निविरिकल्मापी।कुमकपालजो हिनी।अनुपसर्जनलक्षण ईकारो न प्राप्नोति।एवं त
र्हि शस्त्र्यामेवं शस्त्रीशब्दो वर्त्तते देवदत्तायां श्यामाशब्दः।एवमपि गुणोऽनिर्दिष्टो भवति।बहवः शस्त्र्यां गुणाः।तीक्ष्णास्व

दमापृथुरिति। अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः। तद्यथा। चंद्रमुखी देवदत्तेति। बहवश्चंद्रगुणाः। य
श्चासौ प्रियदर्शनता सा गम्यते। एवमपि समानाधिकरणेन निवर्त्तते व्यधिकरणत्वात् समासो न प्राप्नोति। किं हि वचनान्न भ
वति। यद्यपि तावद्वचनात् समासः स्यात्। इह खलु मृगीव चपला मृगचपला समानाधिकरणलक्षणः पुंवद्भावो न प्रा
प्नोति। एवं न हि न स्यामभवो न मयं वर्त्तते। एतस्यात्र युक्तमन्त्र स्यामेवोनग्रं वर्त्तत इति। इतरथा हि वद्धपेक्षं स्यात्। यदि तावि
वं विग्रहः स्यात्। शस्त्रीव श्यामा देवदत्तेति। शस्त्रीश्यामेत्येतदपेक्षं स्यात्। अथ यथैवं विग्रहः क्रियते। यथा शस्त्री श्यामा
न इदियं देवदत्तेति। एवमपि देवदत्तायां श्यामेत्येतदपेक्षं स्यात्। एवमपि गुणेन निर्दिश्यते भवति। बहवश्च शस्त्रीगुणा
नीक्ष्णा। सत्यामेव पृथुरिति। अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः। तद्यथा। चंद्रमुखी देवदत्तेति। बहव
श्चंद्रगुणाः। यश्चासौ प्रियदर्शनता सा गम्यते। उपमानसमासे गुणवचनस्य विशेषणात्कृत्वा सामान्यवचनाप्रसिद्धिः।
उपमानसमासे गुणवचनस्य विशेषणात्का सामान्यवचनस्याप्रसिद्धिः स्यात्। शस्त्रीश्यामेति श्यामाशब्दो शस्त्री
शब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते। तत्र सामान्यवचनैरिति समासो न प्राप्नोति। न वा श्यामत्वस्योभयत्र
भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वप्रसिद्धिः। न वा एष दोषः। किं कारणं। श्यामत्वस्योभयत्र भावात्। उभय ३०

त्रैवात्र श्यामत्वमस्ति शस्त्र्यां देवदत्तायां च तद्वाचकत्वाच्च शब्दस्य। तद्वाचकश्चात्र श्यामाशब्दः प्रयुज्यते। किं वाचकः। उभयवा
चकः। श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनत्वं प्रसिद्धं। सामान्यवचने प्रसिद्धे सामान्यवचनैरि
ति समासो भविष्यति। नावश्यं स एव सामान्यवचनः यो बहूनां सामान्यमाह। द्वयोरपि यः सामान्यमाह सोऽपि सामान्य
वचन एव। अथवा सामान्यवचनैरित्युच्यते। सर्वश्च शब्दोऽन्येन शब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते। न एवं विज्ञा
स्यामः। प्रागभिसंबंधाद्यः सामान्यमेव वचन इति। उपमा। उपमितं॥ सामान्याप्रयोग इति किमर्थं। इह माभूत्। पुरुषोऽयं व्याघ्र
इव शूरः। पुरुषोऽयं व्याघ्र इव बलवान्। सामान्याप्रयोग इति शक्यमवक्तुं। इह कस्मान्न भवति। पुरुषोऽयं व्याघ्र इव शूर इति। पु
रुषोऽयं व्याघ्र इव बलवानिति। असामर्थ्यात् कथमसामर्थ्यं सापेक्ष [illegible]
प्रयोग इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवति वै प्रधानस्य सापेक्षस्यापि समास इति। किमेतस्य ज्ञापने प्रयोज
नं। राजपुरुषोऽभिरूपः राजपुरुषो दर्शनीयः। अत्र वृत्तिसिद्धा भवति॥ ॥विशेषणं॥ ॥विशेषणविशेष्ययोरुभ
यविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनाप्रसिद्धिः। कृष्णतिला इति। कृष्णशब्दोऽयं तिलशब्देनाभिसंबध्यमानो
३१ विशेषणवचनः संपद्यते। तथा तिलशब्दः कृष्णशब्देनाभिसंबध्यमानो विशेषणवचनः संपद्यते तदुभयं विशेष

णान्भवति। उभयं च विशेष्यं॥ विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनस्याप्रसिद्धिः नवान्य
तरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसिद्धिर्न वा एष दोषः। किं कारणं। अन्यतरस्य प्रधानभावात्। अ
न्यतरदत्र प्रधानं तद्विशेषकत्वाच्चापरस्य तद्विशेषकं चापरं। अन्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनसंज्ञा
भविष्यति। यदा अस्य तिलाः प्राधान्येन विवक्षिता भवंति कृष्णा विशेषकत्वेन तदा तिलाः प्रधानं कृष्णा विशेषणं। काम
तर्ह्यनेनैव हेतुना यस्य कृष्णाः प्राधान्येन विवक्षिता भवंति तिला विशेषणत्वेन तेन कर्त्तव्यं तिलकृष्णा इति। न कर्त्तव्यं।
न ह्ययं द्वंद्वः। तिलाश्च कृष्णाश्चेति। न खल्वपि षष्ठीसमासः। तिलानां कृष्णा इति। किं तर्हि द्वाविमौ प्रधानशब्दौ एकस्मिन्न
र्थे युगपदवरुध्येते। न च द्वयोः प्रधानशब्दयोरेकस्मिन्नर्थे युगपदवरुध्यमानयोः किंचिदपि प्रयोजनमस्ति। न तत्र प्रयोग
देव तद्रष्टव्यं। नूनमत्रान्यतरत्प्रधानं तद्विशेषकं चापरमिति। न त्वेतावान् संदेहः। किं प्रधानं किं विशेषणमिति।
स चापि संदेहः। यत्रोभौ गुणशब्दौ तद्यथा खंजः कुब्जः खंजकुब्ज इति। यत्र त्वन्यतरत् द्रव्यं अन्यतरो गुणस्तत्र यद्द्र
व्यं तत्प्रधानं। तद्यथा शुक्लमाजनेन कृष्णमालन्नेनेति निनपिष्टपिंडमालन्यकृती भवति। अवश्यं तद्गुणं द्रव्यमाकां
क्षति। कथं तर्हि इमौ द्वौ प्रधानशब्दौ एकस्मिन्नर्थे युगपदवरुध्येते वृक्षः शिंशपेति। नैनयोरावश्यकः समावेशः। नन्य ३१

वृक्षः। शिंशपोस्ति॥ ॥पूर्वापरप्रथम॥ ॥अथ किमर्थमुत्तरत्रैवमाद्यनुक्रमणं क्रियते न विशेषणं विशेष्येण बहुल
मित्येव सिद्धं। बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यं। अकृत्स्नं च बहुलवचनमित्युत्तरत्रानुक्रमणं क्रियते।
यद्यकृत्स्नं पदेन न कृतं अकृतं नंनत्। एवं तर्हि न ब्रूमो कृत्स्नमिति। कृत्स्नं च कारकं च साधकं च निर्वर्तकं च यच्चानेन कृतं सुकृ
तं नत। किमर्थं तर्ह्येवमाद्यनुक्रमणं क्रियते उदाहरणभूयस्त्वात्। एते खल्वपि विधयः सुपरिगृहीता भवंति येषु लक्षणं
प्रपंचश्च। केवलं लक्षणं केवलः प्रपंचो वा न तथाकारकं भवति। अवश्यं खल्वप्यस्माभिरिदं वक्तव्यं। बहुलमन्यतरस्यां उ
भयथा वा एकेषामिति। सर्वे वेदपारिषदं हीदं शास्त्रं तत्र नैकः पंथाः शक्य आस्थातुं॥ ॥श्रेण्यादयः॥ ॥श्रेण्यादयः॥ पा
ठ्यंते। कृतादिराकृतिगणः। श्रेण्यादिषु च्व्यर्थवचनं। श्रेण्यादिषु च्व्यर्थग्रहणं कर्त्तव्यं। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः।
पदादिश्रेणय एव किंचित् क्रियते न दा मा भूदिति। अन्यत्रायं च्व्यर्थग्रहणोपुच्व्यंतस्य प्रतिषेधशास्ति न दिह न तथा किं कारणं।
अन्यत्र पूर्वं च्व्यन्तकार्यपरं च्व्यर्थे कार्यं इह पुनः पूर्वं च्व्यर्थे कार्यं परं च्व्यंतकार्यं॥ ॥क्तेन नञ्॥ ॥नञ्विशिष्टेसमानप्रकृतिग्रह
णं नञ्विशिष्टे समानप्रकृतिग्रहणं कर्त्तव्यं। इह मा भूत्। सिद्धं चाभुक्तं चेति॥ अनषित्रि निषप्रतिषेधो वक्तव्यः। इह मा
भूत्। कर्त्तव्यमकृतमिति। नुडिडधिकेन च। नुडिडधिकेन च समासो वक्तव्यः। इहापि यथा स्यात्। अशितानशितेन

भवति। क्लिष्टः क्लिशितेनेति। किमुच्यते। समानप्रकृतिग्रहणं कर्त्तव्यमिति यदा नञ्विशिष्टेनेत्युच्यते। न चात्र नञ्
कृत एव विशेषः। किं तर्हि प्रकृतिकृतोपि। अयं विशिष्टशब्दोस्त्येवावधारणे वर्त्तते। तद्यथा देवदत्तयज्ञदत्तावाढ्याव
वभिरूपौ दर्शनीयौ पटू एवं जौ। देवदत्तस्य यज्ञदत्तात्स्वाध्यायेन विशिष्टः स्वाध्यायेनैव तिगम्यते। अन्ये गुणाः समाना भवंति
अस्त्याधिक्ये वर्त्तते। तद्यथा देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पटू एवं तौ देवदत्तस्य यज्ञदत्तात्स्वाध्यायेन विशिष्टः
स्वाध्यायेनाधिकः। अन्ये गुणा अविवक्षिता भवंति। तद्यदा तावदवधारणे विशिष्टशब्दस्तदा नैवार्थः समानप्रकृतिग्रहणे
न। नेह भविष्यति सिद्धं चामुक्तं चेति। नाप्यनञिति प्रतिषेधेन नेह भविष्यति। कर्त्तव्यमकृतमिति। तुडिडधिकेनापि तु तदा स
मासेन प्राप्नोति। यदाधिक्ये विशिष्टशब्दस्तदा समानप्रकृतिग्रहणं कर्त्तव्यं। इह मा भूत सिद्धं चामुक्तं चेति। अनञिति प्र
तिषेधो वक्तव्यः। इह मा भूत कर्त्तव्यमकृतमिति। तुडिडधिकेनापि तदा समासः सिद्धो भवति। तत्राधिक्ये विशिष्टशब्दं मत्वा स
मानप्रकृतिग्रहणं चोद्यते। अवधारणं तु ज्ञात्वा चेत् तुडिड्विशिष्टेन नञ्कल्पेत। अथ परिच्छेदाय कविवक्षा कार्यं तुल्यं प्रकृतिकेनेति
कृतापकृतादीनां चोपसंख्यानं। कृतापकृतादीनां चोपसंख्यानं कर्त्तव्यं। कृतापकृतं। भुक्तविभुक्तं। पीतविपीतं। सिद्धं तु क्तेन
विसमाप्तावनञ्। सिद्धमेतत् कथं। क्तेन क्रियासमाप्तावनञ् क्तांतं समस्यत इति वक्तव्यं। गतप्रत्यागतादीनां चोपसंख्यानं।
गतप्रत्यागतं। पुटापुटिका। कयाकयिका। फलाफलिका। मानोन्मानिका॥ युवा खलतिपलित॥ ॥ अयुक्तोयं निर्देशः। २२

समानाधिकरणेन निवर्त्तते। कः प्रसंगो यद्व्यधिकरणानां समासः स्यात्। एवं तर्हि ज्ञापयत्याचार्यः। यथाजातीयकं
सूत्तरपदं तथाजातीयकेन पूर्वपदेन समासो भवतीति। किमेतस्य ज्ञापने प्रयोजनं। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि
ग्रहणं भवतीत्येषा परिभाषा न कर्त्तव्या भवति। युवा खलति॥ ॥वर्णो वर्णेन॥ ॥इदं विचार्यते। वर्णेन तृतीयासमासो वा स्या
त्। कृष्णेन सारंगः कृष्णसारंग इति। समानाधिकरणो वा कृष्णः सारंगः कृष्णसारंग इति। कश्चात्र विशेषः। वर्णेन तृतीयासम
सेन प्रतिषेधे वर्णग्रहणं। वर्णेन तृतीयासमासे न प्रतिषेधे वर्णग्रहणं कर्त्तव्यं। तृतीया पूर्वपदं प्रकृतिस्वरं भवति। अने
न वर्ण इति वक्तव्यं। इह मा भूत्। हिमेनैतः हिमैतः। अथ द्वितीये वर्णग्रहणेनानेन विशेषणेनार्थः। वाढमर्थः। यद्य वर्णेनैतश
ब्दोस्ति। ननु चायमस्ति। आइतः। एतः। कृष्णैतो लोहितैत इति। नार्थ एवमर्थेन वर्णग्रहणेन। पदितावद्यं कर्म्मणि क्तः तृ
तीया कर्म्मणीत्यनेन स्वरेण भवितव्यं। अथापि कर्त्तरि क्तः। परत्वात् कृत्स्वरेण भवितव्यं। अथ समानाधिकरणः। सम
नाधिकरणे द्विवर्णग्रहणं। समानाधिकरणे द्विवर्णग्रहणं कर्त्तव्यं। वर्णो वर्ण्येनेति कर्त्तव्यं। एकं वर्णग्रहणं कर्त
व्यं। इह मा भूत्। परमस्थूलः। परमकृष्ण इति। द्वितीयं वर्णग्रहणं कर्त्तव्यं। इह मा भूत्। कृष्णतिला इति। एकं वर्णग्रहणम
नर्थकं। अवर्णस्य वर्णे वर्णस्य चावर्णे कस्मान्न भवति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। एवं सतितना

न्येतानित्रीणिवर्णग्रहणानिभवंति।समासविधौहिस्वरविधौचैकं।यस्यापितृतीयासमासःतस्यापितान्येतानी
णिवर्णग्रहणानिभवंति।समासविधौहिस्वरविधौचैकं।सामान्येनममतृतीयासमासोनसिध्यति।तृतीयातत्कृ
तार्थेनगुणवचनेनेति।अवश्यंचवर्णेनप्रतिपदंसमासोवक्तव्यः।यत्रतेननसिध्यति।तदर्थकवचनेननसिध्यति।शुक्
वभ्रुःगहरितबभ्रुरिति।तथासतितान्येतानित्रीणिवर्णग्रहणानिभवंति।समासविधौहिस्वरविधौचैकं।अथेदानीं
समानाधिकरणाः सामान्येनसिद्धस्यात्।वाढंसिद्धः।कथं।विशेषणंविशेष्येणबहुलमिति।एवमपिद्वेवर्णग्रहणे
कर्त्तव्ये।स्वरविधावेव।प्रतिपदोक्तस्याभावात्।तस्मात्समानाधिकरणइत्येषपक्षोज्यायान्।समानाधिकरणाधि
कारेप्रधानोपसर्जनानांपरंपरंविप्रतिषेधेन।समानाधिकरणाधिकारेप्रधानोपसर्जनानांपरंपरंभवतिवि
प्रतिषेधेन।प्रधानानांप्रधानस्तुपसर्जनानांतावत्प्रधानं।वृंदारकनागकुंजरैःपूज्यमानमित्यस्यावकाशः।गो
वृंदारकः।अश्ववृंदारकः।पोटायुवतीनामवकाशः।इभ्ययुवतिः।अग्र्ययुवतिरिक्तविनंवतिः।आद्ययुवतिः।
इहोभयंप्राप्नोति।नागयुवतिः।वृंदारकयुवतिः।प्रधानानांपरंप्रधानंभवतिविप्रतिषेधेन।उपसर्जनानांपरमु
पसर्जनं।सन्महत्परमोत्तमोत्कृष्टाइत्यस्यावकाशः।सद्रवः।सद्वृषः।कृत्तुल्याख्याअजात्येत्यस्यावकाशः।तुल्यश्वे २३

तः।तुल्यमहान्।इहोभयंप्राप्नोति।तुल्यसत्।तुल्यमहत्।उपसर्जनानांपरमुपसर्जनंभवतिविप्रतिषेधेन।समानाधि
करणसमासाद्बहुव्रीहिः।समानाधिकरणसमासाद्बहुव्रीहिर्भवतिविप्रतिषेधेन।समानाधिकरणस्यावकाशोवी
रपुरुषोवीरपुरुषः।बहुव्रीहेरवकाशः।कंठेकालः।इहोभयंप्राप्नोति।वीरपुरुषकोग्रामः।बहुव्रीहिर्भवतिविप्रतिषे
धेन।कदाचित्कर्मधारयःसर्वधनाद्यर्थः।कदाचित्कर्मधारयोभवति।किंप्रयोजनं।सर्वधनाद्यर्थः।सर्वधनीसर्वबीजी
सर्वकेशीनटः।गोरखरवदरण्यं।कृष्णसर्पवान्वल्मीकः।लोहितशालिमान्ग्रामः।किंप्रयोजनंकर्मधारयप्रकृतिर्नि
र्मत्वर्थीयैरभिधानंयथास्यात्।किंचकारणंनस्यात्।बहुव्रीहिणोक्तत्वान्मत्वर्थस्य।यद्युक्तत्वंहेतुः।कर्मधारयेणाप्यु
क्तत्वान्नप्राप्नोति।नखल्वपिसंज्ञाश्रयोमत्वर्थीयः।किंतर्ह्यर्थाश्रयः।सयथाबहुव्रीहिणोक्तत्वान्नभवति।एवंकर्म
धारयेणाप्युक्तत्वान्नभविष्यति।एवंतर्हीदंस्यात्।सर्वाणिधनानिसर्वधनानिसर्वधनान्यस्यसंतिसर्वधनीति।नैवं
शक्यं।नित्यमेवंसतिकर्मधारयःस्यात्।तत्रयदुक्तंकदाचित्कर्मधारयइतिएतदयुक्तं।एवंतर्हिभवतिवै।किंचिदा
चार्याःकार्यबहुत्वंकृत्वापठंतिकार्याःशब्दाइतितद्वदिदंपठितं।समानाधिकरणसमासाद्बहुव्रीहिःकर्त्तव्यः।
कदाचित्कर्मधारयःसर्वधनाद्यर्थइति।यदुच्यतेसमानाधिकरणसमासाद्बहुव्रीहिर्भवतिविप्रतिषेधेनेति।

षयुक्तो विप्रतिषेधः। अंतरंगः कर्म्मधारयः। कात्र अंतरंगता। स्वपदार्थे कर्मधारयः। अन्यपदार्थे बहुव्रीहिः। अस्तु विभाषा
कर्म्मधारयः यदा न कर्म्मधारयस्तदा बहुव्रीहिर्भविष्यति। एवमपि यद्यत्र कदाचित्कर्मधारयो भवति कर्म्मधारयप्र
कृतिभिर्मत्वर्थीयैरभिधानं प्राप्नोति सर्वश्चायमेवमर्थो यत्नः कर्म्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं मा भूदिति। ए
वं तर्हि नेदं तस्य योगस्योदाहरणं विप्रतिषेधपरमिति। किं तर्हि इष्टिरियं पठिता समानाधिकरणसमासात् बहुव्रीहिरि
ष्टः। कदाचित्कर्म्मधारयः सर्वधनाद्यर्थ इति। पूर्वदीष्टिः पठितानार्थेनेन। इह हि सर्वे मनुष्याः अल्पेनाल्पेन यत्नेन महतो मह
तोर्थानाकांक्षंति। एकेन माषेण शतसहस्रं। एकेन कुद्दालकेखेन रौसहस्रं। न त्र कर्म्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधा
नमस्तु बहुव्रीहिणेति। बहुव्रीहिणा भविष्यति लघुत्वात्। कथं सर्वधनी सर्वबीजी सर्वकेशी नट इति। इति प्रकरणे सर्वादे
रिनिवक्ष्यामि। नेद्यावश्यं कर्त्तव्यं। गनोबाधनार्थं। कथं गौरखरवदरण्यं। गौरमृगवदरण्यं। कृष्णसर्पवान्वल्मीकः। लोहि
तशालिमान्ग्रामः। अस्त्वत्र विशेषः। जात्यान्त्राभिसंबंधः क्रियते। कृष्णसर्पो नाम सर्पजातिः। सास्मिन्वल्मीकेस्ति
यदा त्वंतरेण जातिं तद्वत्ताभिसंबंधः क्रियते कृष्णसर्पो वल्मीक इत्येव तदा भवति। पूर्वपदातिशय आतिशायि
काद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः। पूर्वपदार्थातिशयविवक्षायामातिशायिकात् बहुव्रीहिर्भवति विप्रतिषे ३७

धेन किं प्रयोजनं सूक्ष्मवस्त्रतराद्यर्थः। आतिशायिकस्यावकाशः पटुतरः पटुतमः। बहुव्रीहेरवकाशः। चित्रगुः शब
लगुः। इहोभयं प्राप्नोति। सूक्ष्मवस्त्रतरः तीक्ष्णशृंगतरः। बहुव्रीहिर्भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। वि
प्रतिषेधपरमित्युच्यते शब्दश्च बहुव्रीहिः। परश्चातिशायिकः इष्टवाचीपरशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवति
एवमप्ययुक्तः। अंतरंग आतिशायिकः। कात्र अंतरंगता। ङ्याप्प्रातिपदिकादातिशायिकः। सुबंतानां बहुव्रीहिः। आति
शायिकोपि नांतरंगः। कथं समर्थात्तद्धित उत्पद्यते। सामर्थ्यं च सुबंतेन। एवमप्यंतरंगः। कथं स्वपदार्थ आतिशायि
कः। अन्यपदार्थे बहुव्रीहिः। एवमपि नांतरंगः। कथं स्पर्द्धायामातिशायिको भवति। न चांतरेण प्रतियोगिनं स्पर्द्धा भ
वति नैव चात्रातिशायिकः प्राप्नोति। किं कारणमसामर्थ्यात्। कथमसामर्थ्यं। सापेक्षमसमर्थं भवतीति। यावता व
ने।८ स्त्राणि तद्वंतमपेक्षंते न तद्वंतमपेक्ष्य वस्त्राणां वस्त्रैर्युगपत्स्पर्द्धा भवति। न त्वयमातिशायिक एवमात्मकः सत्यां व्य
पेक्षायां विधीयते सत्यमेवमात्मकः। यावतांतरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिः। न स्यां सत्यां न वि... तव्या कां
चनांतरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिः। या हि प्रतियोगिनं प्रतिव्यपेक्षा या हि तद्वंतं प्रति न न स्यां न वितव्यं। ब
हुव्रीहिरपि न प्राप्नोति। किं कारणमसामर्थ्यादेव। कथमसामर्थ्यं सापेक्षमसमर्थं भवति। यावता वस्त्राणि व

स्त्रान्तराण्यपेक्षंते।तद्धनाद्याभिसंबंधः।एवंतर्हिनंदंतस्ययोगस्योदाहरणंविप्रतिषेधेपरमिति॥किंतर्हिइष्टिरियंप
ठिता।पूर्वपदातिशयआतिशायिकाद्बहुव्रीहिरिष्टः।सूक्ष्मवस्त्रतराद्यर्थइति।यदीष्टिरियंपठितानार्थोनेन।कथंयेन
युक्तिरुक्ता।वस्त्राणांचवस्त्रांतरैःयुगपत्स्पर्द्धातद्धनाद्याभिसंबंधइति।यदान्यंतरेणावस्त्राणांवस्त्रैर्युगपत्स्पर्द्धातद्ध
नाद्याभिसंबंधःक्रियतेविप्रतिद्वंद्वःतदाबहुव्रीहिः।बहुव्रीहेरातिशायिकः।नतर्हीदानीमिदंभवति।सूक्ष्मतरवस्त्र
इति।भवतियदांतरेणांतद्धनंवस्त्राणांवस्त्रैर्युगपत्स्पर्द्धानिष्पातिद्वंद्वस्तदातिशायिकः।कथंपुनरन्यस्यप्रकर्षेणान्यस्यप्र
कर्षःस्यात्।नैवान्यस्याप्रकर्षेनान्यस्यप्रकर्षेणभवितव्यं।यथैवायंद्रव्येषुयततेनवस्त्राणिमेस्युरिति।एवंगुणेष्वपियतते
सूक्ष्मानेराणिमेस्युरिति॥नात्रातिशायिकःप्राप्नोति।किंकारणं।गुणवचनादित्युच्यतेनचसमासोगुणवचनः।समासो
पिगुणवचनंकथं॥अजहत्स्वार्थावृत्तिरिति।अथाजहत्स्वार्थायांवृत्तौदोषएवजहत्स्वार्थायांचनदोषः।भवतिबहुव्रीहे
तद्गुणसंविज्ञानमपि।तद्यथा।शुक्लवाससमानय।लोहितोष्णीषाःप्रचरंतीतितद्गुणआनीयते।तद्गुणाश्चप्रचरंति।
उत्तरपदातिशयेआतिशायिकोबहुव्रीहेर्बह्वाढ्यतराद्यर्थः।उत्तरपदातिशयेआतिशायिकोबहुव्रीहेर्नभवतिविप्र
तिषेधेन।किंप्रयोजनं।बह्वाढ्यतराद्यर्थः।बह्वाढ्यतरः।बहुसुकुमारतरः।कःपुनरत्रविशेषः।बहुव्रीहेर्वातिशायिकः ३५